J.J
e
15

B.B.R.A.S.
J. M. F.

BOMBAY BRANCH

OF THE

Royal Asiatic Society.

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018

VEDANTASARA

A

TREATISE

ON THE VEDANTA PHILOSOPHY

WITH THE COMMENTARY OF SADĀNANDA

EDITED BY

PANDIT JIBANANDA VIDYASAGARA B. A.

Superintendent, Free Sanskrit College

CALCUTTA

Printed at the Saraswati Press.

1875

प्रकाशित-पुस्तकान्येतानि

१ व्याकरणबोध व्याकरणम्	३।०
२ धातुरूपादर्शः	२
३ शब्दस्तोम—महानिधि—संस्कृत अभिधान	१०
४ सिद्धान्तकौमुदी सरलाटीकासहिता	११
५ सिद्धान्तबिन्दुसार (वेदान्त)	॥०
६ तुलादानादि पद्धति (बङ्गाक्षरैः)	४
७ गयाश्राद्धादि पद्धति	१
८ शब्दार्थ रत्न	॥।०
९ वाक्यमञ्जरी (बङ्गाक्षरैः)	।०
१० छन्दोमञ्जरी तथा छन्दरत्नाकर-सटीक	॥=
११ वेणीसंहार नाटक-सटीक	१
१२ मुद्राराक्षस नाटक-सटीक	१॥०
१३ रत्नावली	॥।०
१४ मालविकाग्निमित्र-सटीक	१॥०
१५ धनञ्जय विजय सटीक	।०
१६ महावीरचरित	१॥०
१७ साङ्ख्यतत्त्व कौमुदी सटीक	२
१८ वैयाकरणभूषणसार	॥।०
१९ लीलावती	॥ ०
२० बीजगणित	१
२१ शिशुपालवध सटीक (माघ)	४
२२ किरातार्जुनीय सटीक (भारवि)	॥
२३ कुमारसम्भव पूर्वखण्ड सटीक	॥।०
२४ कुमारसम्भव उत्तरखण्ड	।०
२५ अष्टकम् पाणिनीयम्	॥।०
२६ वाचस्पत्यम् (संस्कृतशब्दाभिधान)	
२७ कादम्बरी सटीक	
२८ राजप्रशस्ति	
२९ अनुमानचिन्तामणि तथा अनुमानदीधिति	
३० सर्वदर्शनसंग्रह	
३१ भामिनीविलास सटीक	
३२ हितोपदेश सटीक	
३३ भाषापरिच्छेद मुक्तावलीसहित	
३४ बङ्गविवाहवाद	
३५ दशकुमारचरित सटीक	
३६ परिभाषेन्दुशेखर	
३७ कविकल्पद्रुम (बोपदेव)	
३८ चक्रदत्त (वैद्यक)	
३९ उणादिसूत्र सटीक	
४० मेदिनी कोष	
४१ पङ्कतन्त्रम् श्रीविष्णु-शर्म-सङ्कलितम्	२
४२ विद्वन्मोदतरङ्गिणी (चम्पूकाव्य)	
४३ माधवचम्पू	
४४ तर्कसंग्रह दंराजीयानुवाद सहित	
४५ प्रसन्नराघव नाटक श्रीजयदेव कवि रचित	
४६ विवेक चूड़ामणि श्रीमत् शङ्कराचार्यविरचित	

४७ काव्यसंग्रह (सम्पूर्ण) ५
४८ लिङ्गानुशासन सटीक ।०
४९ कृतसंहार सटीक ।=
५० विक्रमोर्वशी सटीक ॥।०
५१ वसन्ततिलकभाण ।=
५२ गायत्री व्याख्या ॥०
५३ साङ्ख्यदर्शन (भाष्यसहित)
साङ्ख्य प्रवचन भाष्य २
५४ भोजप्रबन्ध ॥।०
५५ नलोदय सटीक ॥=
५६ ईश केन कठ प्रश्न मुण्ड
माण्डूक्य, (सटीक सभाष्य) ५
५७ छान्दोग्य (उपनिषद्)
सभाष्य सटीक ५
५८ तैत्तिरीय ऐतरेय श्वेताश्वतर
(उपनिषद्) सभाष्य सटीक २
५९ बृहदारण्यक (उपनिषद्)
सभाष्य सटीक १०
६० सुश्रुत वैद्यक ४
६१ शार्ङ्गधर वैद्यक १
६२ वेतालपञ्चविंशतिः ॥।०
६३ पातञ्जलदर्शन (सभाष्य सटीक)४
६४ आत्मानात्मविवेक बौद्धाधिकार २
६५ मुक्तिकोपनिषत् =
६६ उपमान चिन्तामणि ।०
६७ नागानन्द नाटक १
६८ पूर्वमीमांसादर्शनम् मध्वस्वामि
कृत भाष्यसहितम् २
६९ चन्द्रशेखर चम्पूकाव्यम्
सम्पूर्ण ७
७० ऋग्वेदस्य मन्त्र ब्राह्मणम्
भाष्यसहितम् २
७१ आरण्यकसंहिता भाष्यसहितम्१
७२ विद्धशालभञ्जिका नाटिका
सटीक २
७३ कारण्डव्यूह बौद्धशास्त्रम् २
७४ कुवलयानन्द सटीक अलङ्कार ३
७५ प्रियदर्शिका नाटिका सटीक
श्रीहर्ष विरचित ॥०
७६ सारस्वत व्याकरण सटीक
पूर्वार्द्ध १।०
७७ वासवदत्ता सटीक २
७८ पुष्पबाण विलास काव्य
कालिदास कृत सटीक ॥०
७९ मङ्गिश शतकम् पदारविन्द
शतकम् स्तुति शतकम्, नन्दाक्रान्त
शतकम् कटाक्षि शतकम् १
८० मनुसंहिता कुल्लूकभट्ट कृत
टीका सहित ५
८१ नैषध चरितम् मल्लिनाथ कृत
टीका सहित १०
८२ चन्द्रालोक प्राचीन अलङ्कार ॥०
८३ वीरमित्रोदय स्मृतिशास्त्र १०
८४ भावप्रकाश वैद्यक १०
८५ प्रबोधचन्द्रोदय नाटक
सटीक २

८६ अनर्घराघव नाटक
मुरारि कृत २
८७ दैवतब्राह्मण सभाष्य १
८८ पवित्रेष्टि ब्राह्मण १
८९ मीमांसा परिभाषा ॥०
९० अर्थसंग्रह लौगाक्षी कृत
मीमांसा ॥०
९१ रघुवंश सटीक ॥।०
९२ मेघदूत सटीक ॥०
९३ ईश्वरनिरूपणम् तर्कवाच
स्पति कृतम् ... १
९४ ईश्वरानुमानचिन्तामणि
गङ्गेशोपाध्याय कृत १
९५ न्यायदर्शन सभाष्य सवृत्ति २॥०
९६ सटीक वाल्मीकि रामायण
बालकाण्डस्य प्रथमावधि त्रयो-
दश सर्ग पर्य्यन्तम् ॥।०
९७ सटीक वाल्मीकि रामा-
यण बालकाण्डस्य चतुर्दश
सर्गावधि पञ्चविंशति सर्ग
पर्य्यन्तम् ॥।०
९८ मदनपाल निघण्टु वैद्यक १
९९ संस्कृतचिन्तामञ्जरीप्रथमभागः—
१०० संस्कृत चिन्तामञ्जरी
द्वितीय भागः ।०
१०१ साहित्यदर्पण ॥।०
१०२ श्रीहर्षचरित बाणभट्ट कृत ५
१०३ अमर कोष ॥०
१०४ वेदान्तसूत्र शङ्कराचार्यकृत
शारीरकभाष्य तथा गोविन्दा-
नन्द कृत टीका सहित ७०
१०५ वेदान्त परिभाषा १
१०६ वेदान्तसार सटीक १
१०७ सटीक निदान ४
१०८ कामन्दकी नीतिसार १
१०९ मल्लिकामारुत प्रकरण २
११० अत्रि, विष्णु हारीत,
याज्ञवल्क्य उशना अङ्गिरा यम
आपस्तम्ब, संवर्त्त कात्यायन बृह-
स्पति पराशर व्यास शङ्ख लि-
खित, दक्ष गौतम शातातप व-
शिष्ठ प्रणीत संहिता (धर्म-
शास्त्र) १५
१११ मत्स्यपुराण ६
११२ चरकसंहिता (वैद्यक) सम्पूर्ण ६
११३ रमेन्द्रचिन्तामणि [वैद्यक] ४
११४ भगवद्गीता शाङ्करभाष्य
आनन्दगिरि कृत टीका
तथा श्रीधरस्वामी टीका सहित ५
११५ भावकुतूहल (ज्योतिष) ॥०

कलिकाता संस्कृत विद्यामन्दिरे—वि, ए, उपाधिधारिणः
श्रीजीवानन्द विद्यासागर—भट्टाचार्य्यस्य
सकाशात् लभ्यानि।

00041999

वेदान्तसारः

सुबोधिनी टीकासहितः

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागर भट्टाचार्य्येण

संस्कृत्य प्रकाशितः

41999

—oo—

कलिकातानगरे

सरस्वती यन्त्रेमुद्रितः

वेदान्तसारः।

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये॥
अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति॥

वेदान्तोनाम? उपनिषत्प्रमाणं, तदुपकारीणि शारीरकसूत्रादीनि च।

अस्य वेदान्तप्रकरणत्वात्तदीयैरेवानुबन्धैस्तद्वतासिद्धेर्न ते पृथगालोचनीयाः।

तत्रानुबन्धोनाम? अधिकारिविषयसम्बन्धप्रयोजनानि।

अधिकारी तु? विधिवदधीतवेदवेदाङ्गत्वेनाधीततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्ज्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्म्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता।

काम्यानि ? स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि ।

निषिद्धानि ? नरकाद्यनिष्टसाधनानि ब्रह्महननादीनि ।

नित्यानि ? अकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि ।

नैमित्तिकानि ? पुत्रजन्माद्यनुबन्धिनी जातेष्ट्यादीनि ।

प्रायश्चित्तानि ? पापक्षयमात्रसाधनानि चान्द्रायणादीनि ।

उपासनानि ? सगुणब्रह्मविषयकमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि ।

एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनं, उपासनानान्तु चित्तैकाग्र्यम् । "तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेनेत्यादिश्रुतेः, तपसा कल्मषं हन्ति इत्यादिस्मृतेश्च ।"

नित्यनैमित्तिकयोरुपासनानाञ्च अवान्तरफलं पितृलोकसत्यलोकप्राप्तिः "कर्म्मणा पितृलोको विद्यया देवलोकइत्यादिश्रुतेः ।"

साधनानि ? नित्यानित्यवस्तुविवेकेहामुत्र

फलभोगविरागशमदमादिसम्पत्तिमुमुक्षुत्वानि।

नित्यानित्यवस्तुविवेकस्तावत्? ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम्।

ऐहिकानां स्रक्चन्दनादिविषयभोगानां कर्म्मजन्यतया अनित्यत्ववत् आमुष्मिकानामप्यमृतादिविषयभोगानामनित्यतया तेभ्योनितरां विरतिः, इहामुत्रफलभोगविरागः।

शमदमादयस्तु? शमदमोपरतितितिक्षासमाधानश्रद्धाः।

शमस्तावत्? श्रवणादिव्यतिरिक्तविषयेभ्योमनसोनिग्रहः।

दमः? बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्योनिवर्त्तनम्।

निर्वर्त्तितानां एतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणम्, उपरतिः, अथ वा विहितानां कर्मणां विधिना परित्यागः। is by becoming a yogi

तितिक्षा? शीतोष्णादिद्वन्द्वसहिष्णुता।

निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये समाधिः, समाधानम्।

गुरुवेदान्तवाक्येषु विश्वासः, श्रद्धा।

मुमुक्षुत्वम् ? मोक्षेच्छा ।

एवम्भूतः प्रमाता अधिकारी। "शान्तोदान्त-इत्यादिश्रुतेः। उक्तञ्च, प्रशान्तचित्ताय जितेन्द्रियाय प्रक्षीणदोषाय यथोक्त कारिणे। गुणान्विताय यानुगताय सर्वदा प्रदेयमेतत् सकलं मुमुक्षवे इति।"

विषयः ? जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं, तत्रैव वेदान्तानां तात्पर्य्यात्।

सम्बन्धस्तु ? तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावलक्षणः।

प्रयोजनन्तु ? तदैक्यप्रमेयगताज्ञाननिवृत्तिः, तत्स्वरूपानन्दावाप्तिश्च। "तरति शोकमात्मवित् इत्यादिश्रुतेः ब्रह्म वेद ब्रह्मैव भवति इत्यादिश्रुतेश्च।"

अयमधिकारी जननमरणादिसंसारानलसन्तप्तोदीप्तशिराजलराशिमिवोपस्कारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति। "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतेः।"

सगुरुः परमकृपया अध्यारोपापवादन्यायेनै-

नमुपदिशति। तस्मै सविद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तं तत्त्वतो ब्रह्मविद्यां इत्यादिश्रुतेः।"

असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुन्यवस्त्वारोपः, अध्यारोपः।

वस्तु ? सच्चिदानन्दमद्वयं ब्रह्म।

अज्ञानादिसकलजड़समूहः, अवस्तु।

अज्ञानन्तु ? सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदितिवदन्ति। "अहमज्ञइत्याद्यनुभवात्, देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेश्च।"

इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते।

तथाहि यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः, यथा वा जलानां समष्ट्यभिप्रायेण जलाशयइति तथा नानात्वेन प्रतिभासमानजीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः। अजामेकामित्यादिश्रुतेः।"

इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना, एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनिय-

न्तृत्वादिगुणकं सदसदव्यक्तमन्तर्यामि जगत्कारणमीश्वर इति च व्यपदिश्यते।

सकलाज्ञानावभासकत्वादस्य सर्वज्ञत्वम्। "यः सर्वज्ञः सर्वविदिति श्रुतेः।"

अस्येयं समष्टिरखिलकारणत्वात् कारणशरीरं, आनन्दप्रचुरत्वात् कोषवदाच्छादकत्वाच्चानन्दमयकोषः, सर्वोपरमत्वात् सुषुप्तिः, अतएव स्थूलसूक्ष्मप्रपञ्चलयस्थानमितिचोच्यते।

यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षादित्यनेकत्वव्यपदेशः, यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति, तथाऽज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः। "इन्द्रोमायाभिः पुरुरूपईयते इत्यादिश्रुतेः।"

अत्र समस्तव्यस्तव्याप्तित्वेन समष्टिव्यष्टिव्यपदेशः।

इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना।

एतदुपहितचैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञइत्युच्यते।

एकाज्ञानावभासकत्वादस्य प्राज्ञत्वम्, अस्फुटोपाधितयाऽनतिप्रकाशकत्वम्।

अस्यापीयमहङ्कारादिकारणत्वात् कारणशरीरम्, आनन्दप्रचुरत्वात् कोशवदाच्छादकत्वाच्च आनन्दमयकोषः, सर्वोपरमत्वात् सुषुप्तिः, अतएव स्थूलसूक्ष्मशरीरलयस्थानमिति चोच्यते।

तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानन्दमनुभवतः। "आनन्दभुक् चेतोमुखः प्राज्ञ इति श्रुतेः, सुखमहमस्वाप्सं न किञ्चिदवेदिषमित्युत्थितस्य परामर्शोपपत्तेश्च।"

अनयोर्व्यष्टिसमष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिव चाभेदः।

एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिविम्बाकाशयोरिव चाभेदः। "एषसर्वेश्वर एषसर्वज्ञ एषोऽन्तर्याम्येषयोनिः सर्वस्य प्रभवाप्ययौ हि भूतानां इत्यादिश्रुतेः।"

वनवृक्षतदवच्छिन्नाकाशयोर्जलजलाशयतद्गतप्रतिविम्बाकाशयोर्वा आधारभूतानुपहिताका-

शबदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते। "शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः इत्यादिश्रुतेः।

इदमेव तुरीयं शुद्धचैतन्यं अज्ञानादितदुपहितचैतन्याभ्यां तत्प्रायः पिण्डवद्विविक्तं सन्मात्रावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमित्युच्यते।

अस्याज्ञानस्यावरणविक्षेपनामकं शक्तिद्वयमस्ति।

आवरणशक्तिस्तावत्। अल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमवलोकयितृनयनपथप्रिधायकतया यथाच्छादयतीव तथाऽज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिप्रिधायकतयाच्छादयतीव तादृशं सामर्थ्यम्। तदुक्तं "घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथानिष्प्रभमभ्यनन्दते चातिमूढः। तथावद्यवज्ञाति योमूढदृष्टेः सनित्योपलब्धिस्वरूपोऽहमात्मा।"

अनयावृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसारसम्भावनापि भवति, यथा स्वाज्ञानेनावृतायां रज्ज्वां सर्पत्वसम्भावना।

विक्षेपशक्तिस्तु ? यथा रज्ज्वज्ञानं स्वावृत-रज्जौ स्वशक्त्यासर्पादिकमुद्भावयति, एवमज्ञानमपि स्वावृतात्मनि स्वशक्त्या आकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम्। तदुक्तम् "विक्षेपशक्तिर्लिङ्गादि-ब्रह्माण्डान्तं जगत् सृजेदिति।"

शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतया उपादानञ्च भवति, यथालूता तन्तुकार्य्यं प्रति स्वप्रधानतया निमित्तं, स्वशरीरप्रधानतयोपादानञ्च भवति।

तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी चोत्पद्यते। "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यादिश्रुतेः।"

तेषु जाड्याधिक्यदर्शनात्तमः प्राधान्यं तत्कारणस्य।

तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते।

इमानीव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीभूतानि चोच्यन्ते। एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते।

सूक्ष्मशरीराणि ? सप्तदशावयवानि लिङ्ग-शरीराणि ।

अवयवास्तु ? ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकञ्चेति ।

ज्ञानेन्द्रियाणि । श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि ।

एतान्याकाशादीनां सात्त्विकांशेभ्योव्यस्तेभ्यः पृथक् क्रमेणोत्पद्यन्ते ।

बुद्धिर्नाम । निश्चयात्मिकान्तःकरणवृत्तिः ।

मनोनाम ? सङ्कल्पविकल्पात्मिकान्तःकरणवृत्तिः ।

अनयोरेव चित्ताहङ्कारयोरन्तर्भावः । अनुसन्धानात्मिकान्तःकरणवृत्तिः, चित्तम् । अभिमानात्मिकान्तःकरणवृत्तिः, अहङ्कारः ।

एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते । एतेषां प्रकाशात्मकत्वात् सात्त्विकांशकार्य्यत्वम् ।

इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता सती विज्ञानमयकोषो भवति ।

अयं कर्तृत्वभोक्तृत्वाभिमानित्वेन इहलोकपर-

लोकगामी व्यावहारिकोजीव इत्युच्यते।

मनस्तु कर्मेन्द्रियैः सहितं सन्मनोमयकोषो भवति।

कर्मेन्द्रियाणि ? वाक्पाणिपादपायूपस्थानि। एतानि पुनराकाशादीनां रजोंऽशेभ्योव्यस्तेभ्यः पृथक्क्रमेणोत्पद्यन्ते।

वायवः ? प्राणापानव्यानोदानसमानाः।

प्राणोनाम ? प्राग्गमनवान् नासाग्रस्थानवर्त्ती।

अपानोनाम ? अवाग्गमनवान् पायुादिस्थानवर्त्ती।

व्यानोनाम ? विश्वग्गमनवानखिलशरीरवर्त्ती।

उदानः ? कण्ठस्थानीयः ऊर्द्ध्वगमनवानुत्क्रमणवायुः।

समानः ? शरीरमध्यगताशितपीतान्नादिसमीकरणकरः।

समीकरणन्तु। परिपाककरणं—रसरुधिरशुक्रपुरीषादिकरणम्।

केचित्तु नागकूर्मकृकरदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीत्याहुः।

तत्र नागः ? उद्गिरणकरः।

कूर्मः ? निमीलिनादिकरः।

कृकरः ? क्षुधाकरः।

देवदत्तः ? जृम्भणकरः।

धनञ्जयः ? पोषणकरः।

एतेषां प्राणादिष्वन्तर्भावात् प्राणादयः पञ्चैवेति केचित्।

इदं प्राणादिपञ्चकं आकाशादिगतरजोऽंशेभ्योमिलितेभ्य उत्पद्यते।

इदं प्राणादिपञ्चकं कर्मेन्द्रियसहितं सत्प्राणमयकोषो भवति।

अस्य क्रियात्मकत्वेन रजोऽंशकार्य्यत्वम्।

एषु कोषेषु मध्ये विज्ञानमयोज्ञानशक्तिमान् कर्तृरूपः। = buddhi + jñānendriyāṇi

मनोमय इच्छाशक्तिमान् करणरूपः।

प्राणमयः क्रियाशक्तिमान् कार्य्यरूपः।

योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति।

Variation एतत् कोषत्रयं मिलितं सत् सूक्ष्मशरीरमित्युच्यते।

अथाथखिलसूक्ष्मशरीरं एकबुद्धिविषयतया

वनवज्जलाशयवद्वा समष्टिः, अनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिश्च भवति।

एतत्समष्युपहितं चैतन्यं सूत्रात्मा, हिरण्यगर्भः, प्राणइति चोच्यते, सर्वानुस्यूतत्वात् ज्ञानेच्छाक्रियाशक्तिमदप्रज्ञेशप्रपञ्चमहाभूताभिमानित्वाच्च।

अस्यैषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोषत्रयं, जाग्रद्वासनामयत्वात् स्वप्नः, अतएव स्थूलप्रपञ्चलयस्थानमिति चोच्यते।

एतद्व्यष्युपहितं चैतन्यं तैजसोभवति, तेजोमयान्तःकरणोपहितत्वात्।

अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोषत्रयं, जाग्रद्वासनामयत्वात् स्वप्नः अतएव स्थूलशरीरलयस्थानमिति चोच्यते।

एतौ सूत्रात्मतैजसौ तदानीं सूक्ष्माभिर्मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः। "प्रविविक्तभुक् तैजसइत्यादिश्रुतेः"।

अत्रापि समष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजसयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्चाभेदः।

एवं सूक्ष्मशरीरोत्पत्तिः।

स्थूलभूतानि तु ? पञ्चीकृतानि।

पञ्चीकरणन्तु ? आकाशादिपञ्चभ्येकैकं द्विधा समं विभज्य, तेषु दशसु भागेषु मध्ये प्राथमिकान् पञ्च भागान् प्रत्येकं चतुर्धा समं विभज्य, तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागं परित्यज्य, भागान्तरेषु संयोजनम्। तदुक्तं, द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते इति।

अस्याप्रामाण्यं नाशङ्कनीयं, चित्रत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणार्थत्वात्।

पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च "वैशिष्ट्यात्तु तद्वादस्तद्वाद इति न्यायेन" आकाशादिव्यपदेशः सम्भवति।

तदानीमाकाशे शब्दोऽभिव्यज्यते, वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, अप्सु शब्दस्पर्शरूपरसा, पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च।

एतेभ्यः पञ्चीकृतेभ्योभूतेभ्योभूर्भुवःस्वर्महर्जनस्तपः सत्यमित्येतन्नामकानामुपर्य्युपरि विद्यमानानां,अतलंवितलंसुतलंरसातलंतलातलंमहातलंपातालंनामकानामधोऽधोविद्यमानानां लोकानां, ब्रह्माण्डस्य, तदन्तर्गतचतुर्विधस्थूलशरीराणामन्नपानादीनाञ्चोत्पत्तिर्भवति।

चतुर्विधस्थूलशरीराणि ? जरायुजाण्डजस्वेदजोद्भिज्जाख्यानि।

जरायुजानि ? जरायुभ्यो जातानि मनुष्यपश्वादीनि।

अण्डजानि ? अण्डेभ्यो जातानि पक्षिपन्नगादीनि।

स्वेदजानि ? स्वेदेभ्योजातानि यूकमशकादीनि।

उद्भिज्यानि ? भूमिमुद्भिद्य जातानि लताबृक्षादीनि।

अत्रापि चतुर्विधस्थूलशरीरं एकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः, बृक्षवज्जलवद्वा व्यष्टिरपि भवति।

एतत् समष्ट्युपहितं चैतन्यं वैश्वानरोविरा

ड़िति चोच्यते, सर्वनराभिमानित्वात्, विविधं राजमानत्वाच्च।

अस्यैषा समष्टिः स्थूलशरीरं, अन्नविकारत्वादन्नमयकोषः, स्थूलभोगायतनत्वात् जाग्रदिति चोच्यते।

एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते, सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादिप्रवेष्टृत्वात्।

अस्याप्येषा व्यष्टिः स्थूलशरीरं, अन्नविकारत्वात् अन्नमयकोषः, स्थूलभोगायतनत्वात् जाग्रदिति चोच्यते।

तदानीमेतौ विश्ववैश्वानरौ, दिग्वातार्कप्रचेतोऽश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमाच्छब्दस्पर्शरूपरसगन्धान्।

अग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमादचनादानगमनविसर्गानन्दान्।

चन्द्रचतुर्मुखशङ्कराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमात् संशयनिश्चयाहङ्कार्य्यचैत्तांश्च सर्वानेतान् स्थू-

लविषयानुभवतः। "जागरितस्थानैर्बहिः—प्रज्ञः इत्यादिश्रुतेः।"

"अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितयोः-र्विश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च वा पूर्ववद-भेदः।

एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः।

एषां स्थूलसूक्ष्मकारणशरीरप्रपञ्चानां समष्टिरेकोमहान् प्रपञ्चोभवति, यथा अवान्तरवनानां समष्टिरेकं महद्वनं, यथा वा अवान्तरजलाशयानां समष्टिरेकोमहान् जलाशयः।

तदुपहितं विश्ववैश्वानरादीश्वरपर्य्यन्तं चैतन्यमपि अवान्तरवनावच्छिन्नाकाशवदवान्तरजलाशयगतप्रतिबिम्बाकाशवच्च एकमेव।

आभ्यां महाप्रपञ्चतदुपहितचैतन्याभ्यां तन्नायःपिण्डवदविविक्तं सत् अनुपहितं चैतन्यं "सर्वं खल्विदं ब्रह्मैवेति" महावाक्यस्य वाच्यं भवति, विविक्तं सल्लक्ष्यमपि भवति।

एवं वस्तुन्यवस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः।

इदानीं प्रत्यगात्मनि इदमिदमयमयमारोपयतीति विशेष उच्यते ।

तथाच । अतिप्राकृतस्तु आत्मावै जायते पुत्र इत्यादिश्रुतेः, स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात्, पुत्रेपुष्टे नष्टेऽहमेव पुष्टोनष्टश्चेत्याद्यनुभवाच्च, पुत्रो ह्यात्मेति वदति ।

चार्वाकस्तु सवा एष पुरुषोऽन्नरसमयइत्यादिश्रुतेः, प्रदीप्तगृहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्, स्थूलोऽहं कृशोऽहं इत्याद्यनुभवाच्च, स्थूलशरीरमात्मेति वदति ।

अपरश्चार्वाकः, ते ह प्राणाः प्रजापतिं समेत्य ब्रूयुरित्यादिश्रुतेः, इन्द्रियाणामभावे शरीरचलनाभावात्, काणोऽहं बधिरोऽहं इत्याद्यनुभवाच्च, इन्द्रियाण्यात्मेति वदति ।

अन्यस्तु चार्वाकः अन्योऽन्तर आत्मा प्राणमय इत्यादिश्रुतेः, प्राणाभावे इन्द्रियचलनायोगात्, अहमशनायावानहं पिपासावान् इत्याद्यनुभवाच्च, प्राणआत्मेति वदति ।

इतरस्तु चार्वाकः अन्योऽन्तरआत्मा मनोमय इत्यादिश्रुतेः, मनसि सुप्ते प्राणादेरभावात्, अहं

सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च, मनआत्मेति वदति ।

बौद्धस्तु अन्योऽन्तरआत्मा विज्ञानमय इत्यादिश्रुतेः, कर्तुरभावे करणस्य शक्त्यभावात्, अहं कर्त्ता अहं भोक्ता इत्याद्यनुभवाच्च, बुद्धिरात्मेति वदति ।

प्राभाकरतार्किकौ तु अन्योऽन्तर आत्मा आनन्दमय इत्यादिश्रुतेः, सुषुप्तौ बुद्ध्यादीनामज्ञाने लयदर्शनात्, अहमज्ञ इत्याद्यनुभवाच्च, अज्ञानमात्मेति वदतः ।

भट्टस्तु प्रज्ञानघनएवानन्दमयआत्मेत्यादिश्रुतेः, सुषुप्तौ प्रकाशाप्रकाशसङ्गावात्, मामहं न जानामीत्याद्यनुभवाच्च, अज्ञानोपहितं चैतन्यमात्मेति वदति ।

अपरोबौद्धः असदेवेदमग्रआसीदित्यादिश्रुतेः, सुषुप्तौ सर्व्वाभावादहं सुप्तः सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च, शून्यमात्मेति वदति ।

एतेषां पुत्रादीनां शून्यपर्य्यन्तानामनात्मत्वमुच्यते । एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्त-

रोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वाबाधदर्शनात्, पुत्रादीनामनात्मत्वं स्पष्टमेवेति।

किञ्च प्रत्यगस्थूलो अचक्षुरप्राणो अमना अकर्त्ता चैतन्यं विन्मात्रं सदित्यादिप्रबलश्रुतिविरोधात्, अस्य पुत्रादिशून्यपर्य्यन्तस्य जड़स्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वात्, अहं ब्रह्मेति विदनुभवप्राबल्याच्च, तत्तत्श्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि, पुत्रादिशून्यपर्य्यन्तमखिलमनात्मैव।

अतस्तत्साक्षिकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मतत्त्वमिति वेदान्तविदनुभवः।

एवमध्यारोपः।

अपवादोनाम ? रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववत्, वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वं, तदुक्तं। सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः। अतत्त्वतोऽन्यथा प्रथा विवर्त्त इत्युदाहृतइति।

तथाहि खलूच्यते। यथा एतद्भोगायतनं चतुर्विधस्थूलशरीरजातं, एतद्भोग्यरूपान्नपानादिकं, एतदाश्रयभूतभूरादिचतुर्दशभुवनानि, एतदाश्रय-

भूतं ब्रह्माण्डञ्चैतत् सर्वं एतेषां कारणरूपपञ्चीकृत-तभूतमात्रं भवति।

एतानि शब्दादिविषयसहितानि पञ्चीकृतभू-तजातानि सूक्ष्मशरीरजातञ्चैतत्सर्वमेतेषां कार-णरूपमपञ्चीकृतभूतमात्रं भवति।

एतानि सत्त्वादिगुणसहितानि अपञ्चीकृतप ञ्चभूतान्युत्पत्तिव्यत्क्रमेणैतत्कारणभूताज्ञानोपहित चैतन्यमात्रं भवति।

एतदज्ञानं, अज्ञानोपहितं चैतन्यं चेश्वरादि कं, एतदाधारभूतानुपहितचैतन्यरूपं तुरीयब्रह्म-मात्रं भवति।

'आभ्यामध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोध-नमपि सिद्धं भवति, तथाहि। अज्ञानादिसमष्टिः, एतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यं, एतदनुप-हितं चैतन्यञ्चैतत्त्रयं तन्मायःपिण्डवदेकत्वेनावभा-समानं तत्पदवाच्यार्थोभवति। एतदुपाध्युपहिता-धारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थोभवति।

अज्ञानादिव्यष्टिः, एतदुपहितप्राक्तनत्वादिवि-शिष्टचैतन्यं एतदनुपहितं चैतन्यञ्चैतत्त्रयं तन्मायः-पिण्डवदेकत्वेनावभासमानं त्वंपदवाच्यार्थोभवति।

एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थोभवति।

अथ महावाक्यार्थोवर्ण्यते। इदं तत्त्वमसि वाक्यं सम्बन्धत्रयेण ऋखण्डार्थबोधकं भवति।

सम्बन्धत्रयं नाम? पदयोः सामानाधिकरण्यं, पदार्थयोर्विशेषणविशेष्यभावः, प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभावश्चेति। यदुक्तं, सामानाधिकरण्यञ्च, विशेषणविशेष्यता। लक्ष्यलक्षणसम्बन्धः, पदार्थप्रत्यगात्मनामिति।

सामानाधिकरण्यसम्बन्धस्तावत्? यथा सोऽयं देवदत्तइति वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्य एतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य च एकस्मिन् देवदत्तपिण्डे तात्पर्य्यसम्बन्धः। तथा तत्त्वमसि वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिन् चैतन्ये तात्पर्य्य सम्बन्धः।

विशेषणविशेष्यभावसम्बन्धस्तु? यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायं शब्दार्थै तत्कालविशिष्टदेवदत्तस्य चानन्योन्याभेदव्यावर्त्तकतया विशेषणविशेष्यभावः। तथात्रापि वाक्ये

तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वं पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः।

लक्ष्यलक्षणभावसम्बन्धस्तु ? यथा तत्रैव सप्तव्यायंशब्द्योस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेन अविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः। तथात्रापि वाक्ये तत्त्वम्पदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः। इयमेव भागलक्षणेत्युच्यते।

अस्मिन् वाक्ये नीलमुत्पलमितिवाक्यवदाक्यार्थो न सङ्गच्छते।

तत्र नीलपदार्थनीलगुणस्य उत्पलपदार्थोत्पलद्रव्यस्य च शुक्लपटादिव्यावर्त्तकतयाऽन्योन्यविशेषणविशेष्यरूपसंसर्गस्य, अन्यतरविशिष्टस्यान्यतरस्य वा तदैक्यस्य, वाक्यार्थत्वाङ्गीकरणे प्रमाणान्तरविरोधाभावात् वाक्यार्थः सङ्गच्छते।

अत्र तु तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावसंसर्गस्य, अन्य-

तरविशिष्टस्यानातरस्य वा तदैक्यस्य, वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न सङ्गच्छते।

तत्र गङ्गाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतोविरुद्धत्वाद्वाच्यार्थमशेषतः परित्यज्य तत्सम्बन्धितीरलक्षणायायुक्तत्वाज्जहल्लक्षणा सङ्गच्छते।

अत्र तु गङ्गायां घोषः। प्रतिवसतीतिवत् जहल्लक्षणा न सङ्गच्छते।

अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैक्यरूपस्य वाक्यार्थस्य भागमात्रे विरोधाङ्गागान्तरं अपरित्यज्यानातरलक्षणाया अयुक्तत्वात् जहल्लक्षणा न सङ्गच्छते।

न च, गङ्गापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति तथा तत्पदं त्वंपदं वा वाच्यार्थपरित्यागेन त्वंपदार्थं तत्पदार्थं वा बोधयतु तत् कुतोजहल्लक्षणा न सङ्गच्छते इति वाच्यं।

तच तीरपदार्थावगेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि, तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनः अनातरपदेनानातरपदार्थप्रतीत्यपेक्षाभावात्।

अत्र धावतीतिवाक्यवदजहल्लक्षणापि न सङ्गच्छते।

तत्र धावनगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणायां तद्विरोधपरिहारसम्भवादजहल्लक्षणा सम्भवति। अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैक्यस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्सम्बन्धिनोर्यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधापरिहारादजहल्लक्षणापि न सम्भवत्येव।

न च, तत्पदं त्वंपदं वा स्वार्थविरुद्धांशपरित्यागेनांशान्तरसहितं तत्पदार्थं त्वंपदार्थं वा लक्षयतु अतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणमिति वाच्यं।

एकेन पदेन स्वार्थांशपदार्थान्तरोभयलक्षणाया असम्भवात्, पदान्तरेण तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदार्थप्रतीत्यपेक्षाभावाच्च।

तस्मादयथा सोऽयं देवदत्त इति वाक्यं तदर्थोवा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाच्यार्थस्यांशे विरोधात् विरुद्धतत्कालैतत्कालविशिष्टत्वांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति।

तथा तत्त्वमसीति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाच्यार्थस्यांशे विरोधादविरुद्धपरोक्षत्वापरोक्षत्वविशिष्टत्वांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयति।

अथ अहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते।

एवमाचार्य्येणाध्यारोपापवादपुरःसरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति।

सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञानं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते, तदा पटकारणतन्तुदाहे पटदाहवत् अखिलकार्य्यकारणेऽज्ञाने बाधिते सति तत्कार्य्यस्याखिलस्य बाधितत्वात् तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति।

तच्च वृत्तौ प्रतिबिम्बितं चैतन्यमपि यथा प्रदीपप्रभा आदित्यप्रभावभासनासमर्था सती तयाभिभूता भवति, तथा स्वयंप्रकाशमानप्रत्यगभिन्न-

परब्रह्मात्रभासनानर्हतया तेनाभिभूतं सत् स्वोपाधिभूताखण्डवृत्तेर्बोधितत्वात् दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत् प्रत्यगभिन्नपरब्रह्ममात्रं भवति।

एवञ्च सति मनसैवानुद्रष्टव्यं, यन्मनसा न मनुते, इत्यनयोः श्रुत्योरविरोधः। वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात् उक्तञ्च "फलव्याप्यत्वमेवास्य शास्त्रतङ्किर्निराकृतम्। ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति।" स्वयं प्रकाशमानत्वान्नाभास उपयुज्यते, इति च।

जड़पदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति। तथाहि, अयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन जड़मपि घटं भासयति तदुक्तम्। "बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम्। तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेदिति।"

यथा प्रदीपप्रभामण्डलमन्धकारगतं घटादिकं विषयीकृत्य तद्गतान्धकारनिरसनपुरःसरं स्वप्रभया तदवभासयतीति।

एवं स्वस्वरूपचैतन्यसाक्षात्कारपर्य्यन्तं श्रवणमननिदिध्यासनसमाध्यनुष्ठानस्यावेक्षितत्वात् तेऽपि प्रदर्श्यन्ते।

श्रवणं नाम ? षड्विधलिङ्गैरशेषवेदान्तानामद्वितीयवस्तुनि तात्पर्य्यावधारणम्।

लिङ्गानि तु ? उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि। तदुक्तम् "उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णये।"

तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपादानम्, उपक्रमोपसंहारौ। यथा छान्दोग्ये षष्ठे प्रपाठके प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः एकमेवाद्वितीयमित्यादौ ऐतदात्म्यमिदं सर्वमित्यन्ते च प्रतिपादनम्।

प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनम्, अभ्यासः। यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम्।

प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तरेणाविषयीकरणम्, अपूर्वत्वम्। यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम्।

फलन्तु ? प्रकरणप्रतिपाद्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तच्च श्रूयमाणं प्रयोजनम्। यथा तत्रैव आचार्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिप्रयोजनं श्रूयते।

प्रकरणप्रतिपाद्यस्य तत्र तच्च प्रशंसनम्, अर्थवादः। यथा तत्रैव उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनम्।

प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः, उपपत्तिः। यथा तत्र, यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद् वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यं इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते।

मननन्तु ? श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभिरनवरतमनुचिन्तनम्।

विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तु सजातीयप्रत्ययप्रवाहः, निदिध्यासनम्।

समाधिस्तु ? द्विविधः। सविकल्पको निर्विकल्पकश्चेति।

तत्र सविकल्पकोनाम ? ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्। तदा स्वप्नमयगजादिभानेऽपि स्वज्ञानवत् द्वैतभानेऽप्यद्वैतं वस्तु भासते। तदुक्तमभियुक्तैः, दृग्विस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमव्ययम्। अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तम्। दृग्विस्तु शुद्धोऽहमविक्रियात्मको न मेऽस्ति बन्धो न च मे विमोक्ष इत्यादि।

निर्विकल्पकस्तु ? ज्ञातृज्ञानादिभेदलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाबुद्धिवृत्तेरतितरामेकीभावेनावस्थानम्। तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवावभासते। ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति। उभयत्र दृश्यभाने समानेऽपि तत्साक्षावासाक्षात्वमात्रेणानयोर्भेदोपपत्तेः।

अस्याङ्गानि ? यमनियमासनप्राणायाम प्रत्याहारधारणाध्यानसमाधयः।

तत्राहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहाः यमाः।

शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि, नियमाः।

करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीनि, आसनानि।

रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः, प्राणायामाः?

इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं, प्रत्याहारः।

अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं, धारणा।

तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्य अन्तरिन्द्रियवृत्तिप्रवाहः, ध्यानम्।

समाधिस्तु? उक्तः सविकल्पक एव।

एवमस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति।

लयस्तावत्? अखण्डवस्त्वनवलम्बनेनं चित्तवृत्तेर्निद्रा।

अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः।

लयविक्षेपाभावेऽपि चित्तवृत्तेरागादिवासनया स्तब्धीभावात् अखण्डवस्त्वनवलम्बनं, कषायः।

अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पानन्दास्वादनं, रसास्वादः। समाध्यारम्भसमये सविकल्पानन्दास्वादनं वा।

अनेन विघ्नचतुष्टयेन रहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्विकल्पकः समाधिरित्युच्यते। तदुक्तं "लये सम्बोधयेत् चित्तं विक्षिप्तं शमयेत् पुनः। सकषायं विजानीयात् शमप्राप्तं न चालयेत्। नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्" इत्यादि। यथा दीपो निवातस्थो नेङ्गते इत्यादि च।

अथ जीवन्मुक्तलक्षणमुच्यते।

जीवन्मुक्तोनाम स्वस्वरूपाखण्डशुद्धब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः। भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे इत्यादिश्रुतेः।

अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेण, आन्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेण, अशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च तत्तत्पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धान्यारब्धफलानि च पश्यन्नपि, बाधितत्वात् परमार्थतो न पश्यति। यथा इदमिन्द्रजालमिति ज्ञानवान् तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। सचक्षुरचक्षुरिव सकर्णोऽकर्णइव समना अमनाइव सप्राणोऽप्राण इव इत्यादिश्रुतेः। उक्तञ्च, सुषुप्तवज्जाग्रति योन पश्यति द्वयञ्च पश्यन्नपि चाद्वयत्वतः। तथापि कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः इति।

अस्य ज्ञानात् पूर्वं विद्यमानानामेवाहारविहारादीनां अनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति, शुभाशुभयोरौदासीन्यं वा। तदुक्तं, मुक्ताद्वैतसतत्त्वस्य यथेष्टाचरणं यदि। शुनां तत्त्वदृशाञ्चैव को भेदोऽशुचिभक्षणे। ब्रह्मविन्नन्तथा मुक्तो सत्रात्मज्ञो न चेतर इति।

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृ-

त्वाद्यः सङ्गुणाश्चालङ्कारवदनुवर्त्तन्ते तदुक्तं, उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वाद्यो गुणाः। अयत्नतो भवन्त्यस्य न तु साधनरूपिणः इति।

किं बहुना, अयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः सन्। तदवसानेप्रत्यगानन्दपरब्रह्मणि प्राणे लीने सति। अज्ञानतत्कार्य्यसंस्काराणामपि विनाशात् परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डं ब्रह्मावतिष्ठते, न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते विमुक्तश्च विमुच्यति इत्येवमाहिश्रुतेः इति।

समाप्तो मूलग्रन्थः॥



ओं तत्सत्।

वेदान्तसारटीका सुबोधिनी।

कृष्णानन्दं गुरुं नत्वा परमानन्दमद्वयम्।
वक्ष्ये वेदान्तसारस्य टीकां नाम्ना सुबोधिनीम्॥

इह खलु कश्चिन्महापुरुषो नित्याध्ययनविध्यधीतसकलवेदराशीनां चिन्मात्राश्रयतद्बोधयानन्दविषयानाद्यनिर्वचनीयभावरूपाज्ञानविलसिता-नलभवानुष्ठितकाम्यनिषिद्धवर्जितनित्यनैमित्तिकप्रायश्चित्तोपासनाकर्म्मभिः सम्यक् प्रसन्नेश्वराणां दृष्टकाचूर्णादिसङ्कर्षितादर्शतलवदतिनिर्म्मलाशयानां नलिनीदलगतजलविन्दुवद्विरण्यगर्भादिस्तम्बपर्य्यन्तं जीवजातं स्वात्मव-न्मृत्योरास्यान्तरगतं क्षणभङ्गुरं तापत्रयाग्निसन्दह्यमानं अनिशमात्मन्द-नुपश्यतां अतिविवेकिनां अतएव ऐहिकस्रक्चन्दनादिविषयभोगेभ्यः आमुष्मिकहैरण्यगर्भाद्यमृतभोगेभ्यश्च वालाग्रेण दूयातिनिर्व्विण्णमानसानां समादिसाधनसम्पन्नानां आपातनोऽवगताखिलवेदार्थत्वाद्देहाद्यहङ्कार-पर्य्यन्तजडपदार्थतद्विलक्षणस्वप्रकाशस्वरूपप्रत्यगात्मनि ब्रह्मानन्दत्वे संश-यापन्नानां तज्जिज्ञासूनां अल्पश्रवणेन मूलाज्ञाननिवृत्तिपरमानन्दाप्ति-सिद्धये प्रकरणमारभमाणः समाप्तिप्रचयगमनादिफलक शिष्टाचारपरि-प्राप्तेष्टदेवतानमस्कारलक्षणमङ्गलाचरणस्य अवश्यकर्त्तव्यतां दर्शयन् लक्ष-णया अनुबन्धचतुष्टयं निरूपयन् परमात्मानं नमस्करोते। अखण्ड-मित्यादिना। अभीष्टस्य निःश्रेयसस्य सिद्धये प्राप्त्यर्थं आत्मानं आत्मने एकत्वेन प्रतिपाद्य इत्यर्थः।

41999

नन्वविषयस्यात्मनः कथं प्रतिपत्तिरित्याशङ्क्याह । अखिलाधार-मिति । अखिलस्य चराचरात्मक प्रपञ्चस्य विवर्त्ताधिष्ठानत्वेन कारणत्वा-क्रान्तं ब्रह्मैव प्रतिपद्ये न तु शुद्धमित्यर्थः ।

नन्वेवं सति प्रतिपत्तिविषयत्वेन दृश्यत्वापत्तिमाशङ्क्याह । अवाङ्-मनसगोचरमिति । यतोवाचोनिवर्त्तन्तेऽप्राप्य मनसा सह इत्यादिश्रुति-भिरविषयत्वप्रतिपादनात् । प्रतिपत्तिर्विषयत्वं कारणत्वोपलक्षितब्रह्मवि-षयकत्वेनौपचारिकमिति भावः ।

नन्वेवमपि ब्रह्मणः कारणत्वे मृत्पिण्डवदनित्यत्वशङ्कामपहरन्नाह । सदिति । नाशाभावोपलक्षितस्वरूपम् । सदेव सौम्येदमग्र आसीदित्यादि-श्रुतेः ।

ननु तथापि जड़त्वापत्तिमाशङ्क्याह । चिदिति । स्वप्रकाशचैतन्य-स्वरूपमिति यावत् ।

ननु तथापि पुरुषार्थत्वात् किमित्यास्पदणीयमित्यत आह । आनन्द-मिति । परमानन्दस्वरूपमित्यर्थः ।

ननु तथापि भक्तिनेऽपि लघुने न शान्तो व्याधिरिति न्यायेन प्रपञ्च-स्याधिष्ठानतया व्यतिरिक्तप्रतीयमानत्वात् कथमद्वैतसिद्धिरित्याशङ्क्यं हृणी-कुर्व्वन्नाह । अखण्डमिति । स्वजातीयविजातीयस्वगतभेदशून्यमित्यर्थः ।

अत्र सच्चिदानन्दमिति प्रयोजनम् । अखण्डमिति विषयः । शास्त्र-विषययोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धः । तत्कामोऽधिकारी । इत्यनुबन्धचतुष्टयमर्थादुक्तम्भवति ।

किञ्च यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता-ह्यर्थाः प्रकाशन्ते महात्मनः । इत्यादिश्रुत्या गुरुनमस्कारस्यापि शास्त्रा-ङ्गत्वप्रतिपादनात्तन्नमस्कारोऽपि पृथक्त्वेन कार्य्य इति तन्निर्पूर्वकमभिधेय-त्वं प्रतिजानीते । अर्थतइति । अपिना डित्थादिवत् संज्ञामात्रं व्यव-च्छिद्यते । न केवलं शब्दतः अर्थतः शब्दतश्चेति । अद्वयानन्दरूपान् गुरून् आराध्य वेदान्तसारं यथामति यक्ष्ये इत्यन्वयः । अद्वयाश्च ते आनन्दाश्चेति अद्वयानन्दास्तान् ।

६७९१

तत्र हेतुमाह। अतीतद्वैतभानत इति। अतीतं गतं द्वैतभानं यतस्तस्मादतीतद्वैतभानतः निरस्तसमस्तभेदज्ञानत्वादित्यर्थः। तान् गुरून् आराध्य कायवाङ्मनोभिर्नमस्कारगोचरीकृत्य वेदान्तसारं वेदान्तानामुपनिषद्वाक्यजातानां मध्ये यत् सारं सिद्धान्तरहस्यं यस्मिन् ज्ञाते पुनर्ज्ञातव्यं नावशिष्यते तं वेदान्तसारं यथामति बुद्धिमनतिक्रम्य वक्ष्ये प्रतिपादयिष्ये इत्यर्थः।

इदानीं सर्वस्यापि वस्तुविचारोद्देशपूर्वकत्वात् प्रतिज्ञातं वेदान्तं नामतो निर्दिशति। वेदान्त इति। उपनिषद् एव प्रमाणं उपनिषत्प्रमाणं उपनिषदो यत्र प्रमाणमिति वा। तदुपकारीणि वेदान्तवाक्यसंग्राहकाणि शारीरकसूत्रादीनि च शरीरमेव शारीरं तत्र भवोजीवः शारीरकः समूलते याथातथ्येन निरूप्यते यैः तानि शारीरकसूत्राणि अथातो ब्रह्मजिज्ञासा इत्यादीनि। आदिशब्दोभाष्यादिसंग्रहार्थः। च शब्दोवेदान्तशब्दानुषङ्गार्थः। यद्वा शारीरकसूत्राणि तदुपयार्थवादिवेदान्तार्थसंग्रहवाक्यानि। अथातो ब्रह्मजिज्ञासा इत्यादिसूत्रादीनि। आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यन्ते तेषामपि उपनिषच्छब्दवाच्यत्वादिति भावः।

ननु यद्यपि अवान्तरानुबन्धचतुष्टयमापद्येत अर्थाद्विहितं तथापि परमानुबन्धचतुष्टयस्यानिरूपितत्वात्र प्रेक्षावतां प्रवृत्तिर्न स्यादित्यत आह। अस्तीति वेदान्तसारस्येत्यर्थः।

ननु वेदान्तशास्त्रस्यापि किं अनुबन्धचतुष्टयं येनास्यापि तदुक्तासिद्धिरित्याशङ्क्य मूलशास्त्रस्यानुबन्धचतुष्टयं आविष्करोति। तत्रेति।

यथोद्देशमधिकारिणं लक्षयति। अधिकारीत्यादिना। स्वाध्यायोऽध्येतव्य इति वचनाच्चैवर्णिकानामुपनीतानामध्ययनं नियमेन विधीयते अध्ययनविधिप्रयुक्तमेवाध्ययनं नाध्यापनविधिप्रयुक्तम्। तथा च। अधीतोवेदोवेदाङ्गानि च शिक्षाकल्पव्याकरणछन्दोज्योतिर्निरुक्ताख्यानि येन तेन आपाततोऽधिगतास्खिलवेदार्थः। अत्र सर्ववेदार्थरहस्ये ज्ञाते सति उत्तरग्रन्थवैयर्थ्यपरिहाराय आपातत इत्युक्तम्।

नन्वनधीतवेदानामपि विदुरादीनां तत्त्वज्ञानोत्पत्तिदर्शनात् अध्ययन तत्प्रयुक्तकर्मानुष्ठानवैयर्थ्यमाशङ्क्योत्तरमाह । जन्मान्तर इति । तेषा-माधुनिकाध्ययनाद्यभावेऽपि जन्मान्तरीयाध्ययनादिना चित्तपरिपाकता अस्तीति जन्मनि विनाध्ययनादिना ज्ञानोत्पत्तौ बाधकाभावात् नाध्य-यनादिवैयर्थ्यमिति भावः ।

काम्येति । काम्यस्यापि कर्मणो धर्मसाधनत्वेऽपि यातायातसम्पादक-त्वेन बन्धकत्वात् निषिद्धवत् तद्वर्जनपुरःसरमित्युक्तम् । तथा च नित्या-दिकर्मानुष्ठानेन निर्गतनिखिलकल्मषतया निःशेषनिरस्तसकलकल्मष-त्वेन । (अत्र निखिलपदं काम्यनिषिद्धजनितसुलतदुःखनपरं) तेन निता-न्तनिर्मलस्वान्तः नितान्तमत्यन्तं निर्मलं स्वच्छं स्वान्तमन्तःकरणं यस्य सः तथोक्तः वक्ष्यमाणसाधनचतुष्टयसम्पन्नः प्रमाता अन्तःकरणप्रतिबिम्बि-तचैतन्यमित्यर्थः ।

तदेव स्पष्टं व्याकरोति । काम्येत्यादिना ।

तत्र शमं लक्षयति । शमस्तावदिति । यथा तीव्रायां बुभुक्षायां जा-तायां भोजनादन्यव्यापारो मनसो न रोचते भोजने च विलम्बं न सहते तथा स्वकुचन्दनादिविषयेष्वत्यन्तमरुचिः तत्त्वज्ञानसाधनेषु श्रवणमन-नादिषु अत्यन्तमभिरुचिर्जायते यदा तदा पूर्ववासनाबलात् श्रवणादि-साधनेभ्यः उद्धृत्य स्वकुचन्दनादिविषयेषु गच्छन्मनः येनान्तःकरण-वृत्तिविशेषेण निगृह्यते सवृत्तिविशेषः शमइत्यर्थः ।

इदानीं दमस्य लक्षणमाह । दमइत्यादिः । ज्ञानसाधनश्रवणा-दिभ्योविलक्षणेषु शब्दादिविषयेषु प्रवर्त्तमानानि श्रोत्रादीनि बाह्येन्द्रि-याणि येन वृत्तिविशेषेण निवर्त्तन्ते स दमइत्यर्थः ।

इदानीमुपरतेर्लक्षणमाह । निवर्त्तितानामिति । निगृहीतानामेतेषां बाह्येन्द्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथा तानी-न्द्रियानि सर्वथा न गच्छन्ति तथा तेषां नियन्त्रणेन वृत्तिविशेषेण क्रियते सोपरतिरित्यर्थः ।

उपरतेर्लक्षणान्तरमाह । अथवेति । विहितानां नित्यादिकर्मणां

धिना चतुर्थाश्रमस्वीकारकर्मणा परित्यागः नाहं कर्मैत्यवस्थानं उपरतिरित्यर्थः।

तितिक्षालक्षणमाह। तितिक्षेति। शरीरधर्मस्य शीतोष्णादेः तज्जन्य सुखदुःखादेश्च शरीरेण त्यक्तुमशक्यत्वात् स्वप्रकाशचिद्रूपे स्वात्मनि च शीतोष्णादेरत्यन्ताभावादिति विवेकदीपेन मिथ्याभानस्य शीतोष्णादेर्दुःखस्य यत् सहनं सा तितिक्षेत्यर्थः।

इदानीं समाधानं लक्षयति। निगृहीतस्येति। शब्दादिविषयेभ्यो निगृहीतस्यान्तःकरणस्य श्रवणादौ तदनुगुणेषु तदुपकारेषु अमानित्वादिसाधनविषयेषु समाधिर्नैरन्तर्येण तच्चिन्तनं समाधानमित्यर्थः। आदयः सप्तार्थाः। तथा च पूर्वोक्तसकलविशेषणविशिष्टः प्रमाता अधिकारीत्यर्थः।

अस्मिन्नर्थे श्रुतिं प्रमाणयति। शान्त इति।

यथोद्देशं विषयं निरूपयति। विषयइति। अविद्यारोपितसर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविरुद्धधर्मपरित्यागेनाविशिष्टं शुद्धं चैतन्यं ज्ञेयस्वरूपमेव सर्वेषां वेदान्तवाक्यानां विषय इत्यर्थः।

क्रमप्राप्तं सम्बन्धं लक्षयति। सम्बन्धस्त्विति।

बोध्यबोधकभावइति। बोध्यस्य ब्रह्मात्मैक्यस्वरूपस्य बोधकस्य वेदान्तशास्त्रस्य च बोध्यबोधकभाव एव सम्बन्धइत्यर्थः।

अवशिष्टं प्रयोजनमाह। प्रयोजनन्त्विति। ब्रह्मात्मैकत्वलक्षणचिन्मात्रगताज्ञानतत्कार्यसकलप्रपञ्चनिवृत्तिः पुनस्तत्प्रभावरूपस्वस्वरूपाखण्डानन्दप्राप्तिः फलमित्यर्थः।

ननु लोकेऽप्राप्तस्य क्रियासाध्यस्य स्वर्गादेः पुरुषार्थत्वेन फलत्वं दृष्टं अत्र तु नित्यप्राप्तस्यात्मस्वरूपस्य क्रियासाध्यत्वाभावेन पुरुषार्थत्वाभावात् कथं फलत्वमिति चेन्न अप्राप्तस्यैव पुरुषार्थत्वनियमाभावात्। यथा लोके कस्यचित् विस्मृतकण्ठमणेस्तत्प्रयुक्तयोकाग्निसन्दह्यमानस्याप्तोपदेशोत्तरकालं स्वकण्ठगतत्वाभीकरप्राप्तेरपि पुरुषार्थत्वात् फलत्वं दृष्टं एवमत्रापि नित्यप्राप्तस्यात्मनः अज्ञानमोहान्धकारादृतत्वेन विस्मृतस्वरूपस्य गुरुश्रुतिवाक्यश्रवणानन्तरं अज्ञानमोहान्धकारनिवृत्तौ सत्यां स्वयं प्रकाश-

मानचिद्रूपस्य सिद्धस्यैवात्मनः फलत्वमुपचर्यते इति भावः ।

उक्तेऽर्थे श्रुतिं प्रमाणयति । तरतीति ।

अधुना शास्त्रारम्भनिमित्ताधिकार्यादिनिरूपणानन्तरं शास्त्रारम्भं प्रस्तौति । अथवा लक्षितस्याधिकारिणः कर्त्तव्यं दर्शयति । अयमधिकारीति । उक्तलक्षणलक्षितोबुद्धिसन्निहितोऽधिकारी गुरूपसरतीत्यर्थः ।

ननु संसारासक्तचित्तस्य विषयलोलुपस्यात्तिरहितस्य गुरूपसर्पणमयुक्तमित्याशङ्क्याह । संसारानलसन्तप्तइति ।

सन्तापे हेतुमाह । जननेति । आदिशब्देन व्याध्यादयो गृह्यन्ते ।

सन्तप्तस्यैव गुरूपसर्पणमित्यत्र दृष्टान्तमाह । दीप्तशिराइति । यथा-ह्रदे दग्धमस्तको दाहनिवृत्तिकामोऽटतीति शीतलं जलराशिमनुसरति तथा संसारतापत्रयसन्दह्यमानस्तन्निवृत्तिकामः स्वस्वरूपजिज्ञासुः संसारनिवर्त्तकं श्रोत्रियं ब्रह्मनिष्ठं करतलामलकवत् स्वप्रकाशात्मस्वरूपसमर्पकं गुरुं समीपं गत्वा अनुसरति मनोवाक्कायकर्मभिः सेवत इत्यर्थः ।

अस्मिन् अर्थे श्रुतिमुदाहरति । समित्पाणिरित्यादिः ।

अथ गुरुकृत्यमाह । सपरमकृपयेति । कृपाव्यतिरेकेण साधनान्तराभावादित्यर्थः ।

नन्वखण्डस्य ब्रह्मस्वरूपस्यागोचरत्वेनोपदेष्टुमशक्यत्वात् कथमुपदिशतीत्यत आह । अध्यारोपेति । अखण्डब्रह्मस्वरूपस्य विधिमुखेनोपदेष्टुमशक्यत्वेऽपि नेह नानास्ति किञ्चनेत्यादिश्रुतिमुपस्कृत्य अविद्यारोपितमिथ्यानानापदार्थनिषेधमुखेन उपलक्षितमखण्डचैतन्यमेव पुनः सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतिमनुसृत्य लक्षणया विधिमुखेनापदिशतीति भावः ।

तत्र श्रुतिमाह । तद्धेदं सत्यादिः ।

अस्मिन्नर्थे लौकिकदृष्टान्तमाह । असर्पभूत इति । व्यावहारिकवस्तुत्वेनाभिमते रज्जौ अवस्तुभूतसर्पारोपोनाम (रज्ज्ववच्छिन्नचैतन्यस्याविद्या सर्पज्ञानाभासाकारेण परिणममाना सर्पाकारेण विवर्त्तते) सविवर्त्तः । रज्ज्ववच्छिन्नचैतन्यनिष्ठाविद्योपादानत्वेन नायं सर्पः किन्तु

रज्जुरिति विशेषदर्शनोत्तरकालीनाधिष्ठानरज्जु साक्षात्कारेण रज्ज्वज्ञाननिवृत्तौ सर्पभ्रान्तिर्निवर्त्तते इत्यर्थः।

उक्तमर्थं दार्ष्टान्तिके योजयति। वस्त्विति। कालत्रयानबाधी स्वात्मैव वस्तुशब्दार्थः।

तत्रावस्तुस्वरूपमाह। अज्ञानादीति। अज्ञानतज्जन्यद्वयोमादेर्मिथ्यात्वंदृश्यत्वसावयवत्वविकारित्वसापेक्षसिद्धिकत्वादिहेतुभिरवस्तुत्वमित्यर्थः। lapse

एतदेव विस्तरेण प्रतिपादयितुमज्ञानस्वरूपं तावदाह। अज्ञानन्विति।

किमिदमज्ञानं सद्रूपमसद्रूपं वा, नाद्यः शशविषाणतुल्यत्वेन तुच्छत्वात्, नापि द्वितीयः श्रुतः कारणत्वानुपपत्तेरित्यादिहेतुभिः सत्त्वेनासत्त्वेन वा निरूपयितुं न शक्यते इत्याह। अनिर्व्वचनीयमिति।

नन्वज्ञानस्यानिर्व्वचनीयत्वेन सर्व्वथा ज्ञातुमशक्यत्वात् तदभावप्रसङ्गमाशङ्क्याह। त्रिगुणात्मकमिति। अजामेकामित्यादिश्रुतिभिः सत्त्वरजस्तमोगुणात्मकत्वप्रतिपादनादित्यर्थः।

नन्वेवमजस्याज्ञानस्य श्रुतिप्रसिद्धस्य व्योमादिरूपेण विततस्य सत्यवद्भासमानत्वेन संसारानिवृत्तिरित्याशङ्क्याह। ज्ञानविरोधीति। एतादृशमथज्ञानमात्मसाक्षात्कारेण निवर्त्तते इत्यर्थः। तदुक्तं भगवता, दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इति।

ज्ञानभाव एवाज्ञानमिति तार्किकमतं निराकरोति। भावरूपमिति।

त्रिगुणात्मकभावरूपत्वेऽपि इदमित्थमेवेति निरूढीकृत्य प्रदर्शयितुं न शक्यते इत्याह। यत्किञ्चिदिति। किमप्यघटितघटनापटीय इत्यर्थः।

अनिर्व्वचनीयानादिभावरूपाज्ञानसद्भावे अनुभवमेवोदाहृत्य दर्शयति। अहमिति। अहमज्ञोमामहं न जानामीत्यपरोक्षाभास एव प्रमाणमित्यर्थः।

तस्यैवोपदर्शकत्वेन श्रुतिमुदाहरति। देवात्मशक्तिमिति।

अज्ञानं विभजते। इदमज्ञानमिति। वस्तुतोऽज्ञानस्यैकत्वेऽपि मम-

दृष्टाभिप्रायेणैकमिति व्यवह्रियते व्यष्टयभिप्रायेणानेकमित्यर्थः।

एतदेव प्रपञ्चयितुं प्रतिजानीते। तथाहि यथेति। यथा बहूनां दृक्षाणां समुदायविवक्षया वनमित्येकत्वव्यपदेशः यथा वा बहूनद्यादिजलानां समुदायविवक्षया जलाशय इतेकत्वव्यपदेशः, तथान्तःकरणोपाधिभेदेन नानात्वेन प्रतीयमानानां जीवगताज्ञानानां समुदायविवक्षया अज्ञानमितेकत्वव्यपदेशः।

अस्मिन्नर्थे श्रुतिं प्रमाणयति। अजामिति।

नानाजीवगतनिकृष्टान्तः-करणव्यष्टयुपाध्यपेक्षया समष्टयुपाधेरस्य वैलक्षण्यं दर्शयति। दृश्यं समष्टिरिति। विगतरागादिदोषसकलकार्यप्रपञ्चकारणभूताज्ञानस्य समष्टिभूतोत्कृष्टोपाधित्वेन विशुद्धसत्त्वप्राधान्यमिति भावः।

एतत् समष्टयुपाधिद्वारेणेश्वरचैतन्यं लक्षयति। एतदुपहितमिति। एतत् समष्टयज्ञानोपलक्षितं चैतन्यं सर्वस्य चराचरात्मकप्रपञ्चस्य साक्षित्वेन सर्वज्ञ इत्युच्यते। तथा सर्वेषां जीवानामीशितृत्वेन कर्मानुरूपफलदातृत्वेन ईश्वर इत्युच्यते। तथा सर्वेषां जीवानां प्रेरकत्वेन नियन्तेत्युच्यते। तथा सर्वेषां जीवानामन्तर्हृदये स्थित्वा बुद्धिनियामकत्वेनान्तर्यामीत्युच्यते। प्रमाणागोचरत्वात् अव्यक्तमित्युच्यते। सर्वस्य चराचरात्मकप्रपञ्चस्य विवर्ताधिष्ठानत्वेन जगत्कारणमिति व्यपदिश्यते इत्यर्थः।

उक्तेऽर्थे युक्तिमाह। सकलाज्ञानेति।

तत्र प्रमाणमाह। यः सर्वज्ञ इति।

इदानीं तस्यैवेश्वरस्य समुदायोपाधिरेव कारणशरीरत्वमानन्दमयकोषत्वं सुषुप्तावस्थावैशिष्ट्यञ्च लभते इत्याह। अस्येयमिति।

कारणशरीरत्वे हेतुमाह। अखिलेति।

आनन्दमयत्वे हेतुमाह। आनन्दप्रचुरत्वादिति। कारणत्वावस्थायां प्रकृतिपुरुषमात्रव्यतिरिक्तस्य स्थूलसूक्ष्मप्रपञ्चस्यैवाभावादानन्दबाहुल्यमिति।

कोषत्वे युक्तिमाह। आच्छादकत्वादिति। शरीराच्छादकचर्मवत् आत्माच्छादकत्वादज्ञानस्य कोष इति व्यवहारः।

ननु तथापि कारणत्वोपाधेरज्ञानस्य सुषुप्तित्वं कुत इत्यत आह। सर्वोपरमत्वादिति। सर्वस्य स्थूलसूक्ष्मोपाधेः कारणोपाधौ लीनत्वात् सुषुप्तित्वमित्यर्थः।

ननु स्थूलसूक्ष्मप्रपञ्चलयस्थानस्य कथं सुषुप्तित्वमित्याशङ्क्य संज्ञाभेदो न वस्तुभेदः इत्याह। अतएवेति। यतः=कारणात् सुषुप्तित्वं अतएव पञ्चीकृतभूतकार्यस्य स्थूलप्रपञ्चस्य जाग्रदवस्थाविषिष्टस्यापञ्चीकृतभूतकार्यस्य सूक्ष्मस्वप्नप्रपञ्चस्य तदवस्थानभिज्ञेऽपि व्यवह्रियते इत्यर्थः।

समष्टिरूपाज्ञानं सप्रपञ्चं निरूपेदानीं व्यष्टिरूपमज्ञानं निरूपयितुं दृष्टान्तौ तावद्दर्शयति। यथा वनस्थेति। यथा बहुवृक्षसमुदायस्य वनरूपत्वेनैकत्वव्यवहारेऽपि प्रत्येकवृक्षविवक्षया चूताद्योवृक्षोवृक्षास्तिष्ठन्तीति बहुत्वव्यवहारः। यथा वा वापीकूपतडागादिषु समुदायविवक्षया जलाशय इत्येकत्वव्यवहारेऽपि प्रत्येकं वाप्यादिविवक्षया वह्नानि जलानि तिष्ठन्तीति व्यवहारः। तथा सकलप्रपञ्चकारणस्याज्ञानस्य समुदायरूपेणैकत्वेऽपि अहङ्कारादिकारणीभूतानां जीवगताज्ञानानां प्रतिव्यक्तिविवक्षया बहुत्वव्यवहार इत्यर्थः।

अस्मिन्नर्थे श्रुतिं प्रमाणयति। इन्द्र इति।

ननु तथापि व्यक्तेरसंबद्धाज्ञानस्य तदवच्छिन्नचैतन्यस्य वा व्यष्टिसमष्टिता कुत इत्यत आह। अत्र समस्तेति। भेदविवक्षया व्यष्टित्वं मृद्घटादिवत्, अभेदविवक्षया समष्टित्वं मृत्पिण्डवदित्यर्थः।

तथा महाप्रलयकालीनसमष्टिभूतविशुद्धसत्त्वप्रधानाया मूलप्रकृतेः सकाशात् दैनन्दिनप्रलयकालीनव्यष्टिप्राधिभूतजीव-प्रकृतेर्भेदं दर्शयति। इयं व्यष्टिरिति। इयं जीवगता सुषुप्त्यवस्थापञ्चाहङ्कारादिक्षेप संस्कारादिरूपा निकृष्टोपाधित्वेन मलिनसत्त्वप्रधानेत्यर्थः।

अनेनोपाधिना प्राज्ञचैतन्यं लक्षयति। एतदुपहितमिति।

अत्रोपपत्तिमाह। एकेति। ईश्वरगतमूलाज्ञानस्य जीवगताहङ्का-

रादिविक्षेपसंस्काररूपाज्ञानस्य च वस्तुत एकत्वेन तदवभासकेश्वरजीव-चैतन्ययोरप्येकत्वमित्यर्थः ।

सौषुप्तजीवचैतन्यस्य प्राज्ञत्वं साधयति । अस्य प्राज्ञत्वमिति । संस्काररूपास्यदोषाधितया तदादृतत्वेनाति प्रकाशकत्वाभावात् प्राज्ञत्वमस्येत्यर्थः ।

यथा जगत्कारणेश्वरोपाधेः कारणशरीरत्वमानन्दप्रचुरत्वेन चानन्दमयत्वं कोषदृष्टान्तेन कोषत्वं तथैतत् रूर्व्वं तारतम्येन प्राज्ञचैतन्येषूपतिदिशति । अहङ्कारादीति । प्रलयकाले हिरण्यगर्भादि प्रपञ्चोत्पादकेश्वरगतमूलप्रकृतिवत् सुषुप्तिकाले अहङ्कारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्वं इन्द्रियतद्विषयाभाने व्यासङ्गाभावादानन्दबाहुल्यादानन्दमयत्वं आच्छादकत्वात् कोषत्वञ्च युक्तमितिभावः ।

ननु स्थूलसूक्ष्मशरीरलयस्थानस्य कथं सुषुप्तिशब्दवाच्यत्वमित्याशङ्क्य पूर्ववत् संज्ञाभेदो न वस्तुभेद इति वक्तुं तत्र युक्तिमाह । सर्व्वोपरमत्वादिति । पञ्चीकृतस्थूलशरीरस्य व्यावहारिकस्यापञ्चीकृतसूक्ष्मशरीरे प्रातिभासिके प्रविलापितत्वात् तस्यापि प्रातिभासिकस्य स्वापूप्रपञ्चस्य स्वकारणेऽज्ञाने लीनत्वात् सर्व्वोपरतिरित्यर्थः । तथा चोक्तं, लये फेनस्य तद्धर्म्मादृश्याद्याः सूत्रस्तरङ्गके । तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा । व्यावहारिकदेहस्य लयः स्यात् प्रातिभासिके । तल्लये सच्चिदानन्दाः पर्य्यवस्यन्ति साक्षिणीति ।

ननु प्रलयकाले सुषुप्तिकाले चान्तःकरणतद्वृत्त्यभावेनानन्दाच्छकाभावादानन्दप्राचुर्यसद्भावे प्रमाणाभावमाशङ्क्य परिहरति । तदानीमिति । यथा स्वच्छत्वेनान्तःकरणस्य वृत्तिरङ्गीक्रियते तथा चैतन्यप्रदीप्राज्ञानस्यापि सूक्ष्मावृत्तयः स्वीक्रियन्ते तथाचेश्वरः स्वकीयाज्ञानवृत्तिभिः स्वानन्दबाहुल्यं अनुभवति । जीवोऽपि संस्कारमात्रावशिष्टाज्ञानवृत्तिभिः स्वानन्दबाहुल्यं तारतम्येन अनुभवति इति भावः ।

अतैवोपदृष्टृत्वेन स्तुतिमयतारयति । आनन्दभुगिति ।

उत्तरकालीनसुखपरामर्शोपपत्तिरपि पूर्वानुभूतसुखवासनाजन्यानुभवस्मृत्यादौ प्रमाणमित्याह। सुखमहमिति। सुखमहमस्वाप्समित्यानन्दपरामर्शः। न किञ्चिदवेदिषमित्यज्ञानपरामर्शः। तथाच सुषुप्तिप्रलयादौ प्राज्ञेश्वरावज्ञानवृत्तिभिरानन्दमनुभवत एवेत्यर्थः।

इदानीमीश्वरगतमूलाज्ञानस्य जीवगतसंस्कारमात्रावशिष्टाज्ञानस्य च स्वमध्यस्थत्वाभिप्रायेण भेदभानेऽपि वस्तुतो भेदोनास्तीत्यत्र दृष्टान्तमाह। अनयोरिति।

उक्तोपाधिद्वयद्वारेणेश्वरप्राज्ञयोरप्यभेदं दृष्टान्तमुखेन दर्शयति। एतदुपहितयोरिति।

ईश्वरस्य वनावच्छिन्नाकाशवत् प्राज्ञस्य वृक्षावच्छिन्नाकाशवत् तद्गतप्रतिबिम्बाकाशवच्च कारणोपाध्यवच्छिन्नेश्वरस्य कार्योपाध्यवच्छिन्नप्राज्ञस्य च वस्तुतोऽभेद एवेत्यर्थः।

तत्र प्रमाणमाह। एष इति। तथा चोक्तमाचार्यैः, कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः। कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते इति।

उपाधिद्वयावच्छिन्नौ प्राज्ञेश्वरौ सप्रपञ्चं निरूप्य इदानीं अनवच्छिन्नं तुरीयं चैतन्यं तत् लक्षयति। वनवृक्षेत्यादि। यथा स्थूलवनोपाध्यवच्छिन्नाकाशापेक्षया सूक्ष्मवृक्षोपाध्यवच्छिन्नाकाशापेक्षया च महाकाशस्य तदुभयाधारतया अनवच्छिन्नत्वाच्च तुरीयत्वं, तथा कार्यकारणोपाधितदवच्छिन्नचैतन्यद्वयापेक्षया तदाधारभूतं यदनवच्छिन्नं सर्व्वव्यापि चैतन्यं विशुद्धं तुरीयमुच्यते इत्यर्थः। अस्य चैतन्यस्य तुरीयत्वं वक्ष्यमाणविश्वाद्यपेक्षया द्रष्टव्यम्।

अस्मिन्नर्थे श्रुतिं सम्वादयति। यत्नमिति।

एतदेव विशुद्धचैतन्यं तदेव पूर्वोक्तचैतन्यद्वयेन सह ऐक्यविवक्षातो महावाक्यस्य वाच्यत्वं लभते भेदयिवक्षायाञ्च लक्ष्यत्वं लभते इत्याह। इदमेवेति। त्रयाणां चैतन्यानां चैतन्येन रूपेण एकत्वेऽपि अवच्छिन्नानवच्छिन्नत्वेन रूपेण वाच्यत्वलक्ष्यत्वे सम्भवत इति भावः।

इदानीं स्वप्रकाशचिद्रूपस्यात्मनः कथं कुत्सितप्रकाशत्वं कथं वा असङ्गोदासीनस्यात्मनः आकाशादिप्रपञ्चजनकत्वं इतेत्यत्तन्महाविरोधपरिहाराय्याज्ञानस्य शक्तिद्वयं निरूपयति। अस्याज्ञानस्येति।

ते एव नामतोनिर्दिशति आवरणविक्षेपनामकमिति। आवरणशक्तिस्तावत् सच्चिदानन्दस्वरूपमाद्रणोतीत्यावरणशक्तिः। विक्षेपशक्तिस्तावत् ब्रह्मादिस्थावरान्तं जगत्जलबुद्बुदवन्नामरूपात्मकं विक्षिपति सृजतीति विक्षेपशक्तिः इति शक्तिद्वयमज्ञानस्येत्यर्थः।

नन्वपरिच्छिन्नस्य स्वप्रकाशचिद्रूपाखण्डपरिपूर्णस्वरूपस्यात्मनः परिच्छिन्नेनानित्येन जड़तमोरूपेणाव्यापकेनाज्ञानशक्तिविशेषेण कथमावरणमित्याशङ्क्य वस्तुतोऽज्ञानस्यात्माच्छादकत्वाभावेऽपि प्रमातृबुद्धिमात्माच्छादकत्वेनाज्ञानस्य आच्छादकत्वमुपचारादुच्यते इत्याह। आवरणशक्तिस्तावदिति। यथा अल्पोऽपि मेघोऽनेकयोजन विस्तीर्णं आदित्यमण्डलमवलोकयितृपुरुषदृष्टिमात्माच्छादत्वेन आच्छादयति तथा अज्ञानं परिच्छिन्नमपरिच्छिन्नमात्मानं असंसारिनमवलोकयितृबुद्धिविषयकत्वेनाच्छादयतीत्युपचारादुच्यते इत्यर्थः।

अस्मिन्नर्थे वृद्धसम्मतिमाह। तदुक्तमित्यादि। इयमावरणशक्तिरात्मनोभेदबुद्धिजनकत्वेन संसारहेतुरिति भावः।

अत्रानुरूपं दृष्टान्तमाह। यथाज्ञानेनेति।

यदुक्तमसङ्गोदासीनस्यात्मनः कथं जगत्कारणत्वमिति तन्निराकर्तुं विक्षेपशक्तिस्वरूपमाह। विक्षेपशक्तिरिति। यथा रज्जुविषयकमज्ञानं सर्पमुत्पादयति तथात्मविषयकमज्ञानमपि स्वावच्छिन्ने आत्मनि विक्षेपशक्तिप्रभावेनाकाशादिप्रपञ्चमुत्पादयतीत्यर्थः।

अस्मिन्नर्थे ग्रन्थान्तरसम्मतिं दर्शयति। तदुक्तमिति।

ननु किमात्मा चराचरात्मकप्रपञ्चस्य निमित्तकारणं उपादानकारणं वा। नाद्यः, दण्डादिवत् स्वकार्यव्यापित्वं न स्यात् आत्मनः तत्सृष्ट्वा तदेवानुप्राविशदितिश्रुत्या स्वकार्यव्यापित्वश्रवणात्। नापि द्वितीयः, अचेतनस्य जड़स्य प्रपञ्चस्य चैतन्योपादानकत्वासम्भवात्। उपा-

दानत्वे च कार्यकारणयोरनेन प्रपञ्चस्यापि चैतन्यरूपत्वप्रसङ्गात् अनित्यत्वं न स्यादित्याशङ्क्य जड़प्रपञ्चं प्रत्यात्मनश्चैतन्यप्राधान्येन निमित्तत्वं स्वज्ञानप्राधान्येनोपादानत्वञ्च सम्भवतीत्याह। शक्तिद्वयेति। यथा अयस्कान्तसन्निधाने जड़मपि लोहं चेष्टते तथा चैतन्यसन्निधाने जड़मज्ञानं चेष्टते इत्यज्ञानविकारं प्रति चैतन्यस्य निमित्तत्वं जड़ाकाशादिकार्यं प्रति मायायाः साक्षादुपादानत्वेन मायाविन ईश्वरस्यापि परम्परया उपचारादुपादानत्वं न विरुध्यते इत्यर्थः। यदुक्तं चैतन्यस्य निमित्तकारणत्वे कार्यानुप्रवेशो न स्यादिति, तन्न, कारणस्य कार्यानुप्रवेशनियमस्य उपादानकारणविषयत्वेन निमित्तकारणविषयत्वाभावात्, तत्सृष्ट्वेत्यादिश्रुतेरप्युपादानकारणपरत्वात्। यदप्युक्तं आत्मन उपादानकारणत्वे प्रपञ्चस्यानित्यत्वं न स्यादिति, तदपि न, तस्य परिणामविषयत्वेन विवर्त्तविषयत्वाभावात् प्रपञ्चस्य ब्रह्मविवर्त्तत्वात्। विवर्त्तत्वञ्च स्वस्वरूपापरित्यागेन स्वरूपान्तरप्रदर्शकत्वं यथा रज्ज्ववच्छिन्नचैतन्यनिष्ठाज्ञानस्य रज्जुस्वरूपापरित्यागेन स्वरूपान्तरप्रदर्शकत्वं तथेश्वरचैतन्यनिष्ठाज्ञानशक्तेरपि चैतन्यस्वरूपापरित्यागेन आकाशादिस्वरूपान्तराकारेण प्रदर्शकत्वम्। एतावता आकाशादिप्रपञ्चस्यापि मिथ्यात्वम्। नचैवमज्ञानस्यैव मिथ्यात्वे तत्प्रयुक्तबन्धमोक्षयोरपि मिथ्यात्वप्रसङ्ग इति वाच्यं, इष्टापत्तेः। तदुक्तं भागवते, बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः। गुणस्य मायामूलत्वात् न मे मोक्षो न बन्धनमिति। अलमतिविस्तरेण।

एकस्यैवात्मनो निमित्तकारणत्वे उपादानकारणत्वे च दृष्टान्तमाह। यथा लूतेति। यथा लूता जन्तुः स्वोत्पाद्यमानं कार्यं प्रति स्वचैतन्यप्रधानतया निमित्तं, चैतन्यसन्निधानव्यतिरेकेण जड़स्य देहस्य मृतदेहवत् तन्तुजनकत्वासम्भवात्। स्वशरीरप्रधानामेच्छया उपादानञ्च भवति, अशरीरस्य साक्षात् तन्तुजनकत्वासम्भवात्, शरीरस्य साक्षात् तन्तूपादानत्वेन तदवच्छिन्नचैतन्यस्यापूपादानत्वमुपचारात्, एवमीश्वरस्यापि स्वचैतन्यप्रधानतया निमित्तत्वं स्वोपाधिप्रधानतयोपादानत्वञ्च भवतीत्यर्थः।

इदानीं विक्षेपशक्तिकत्वमाह । तम इति । आकाशादेर्जडत्वात् तमोगुणप्रधानविक्षेपशक्तियुक्ताज्ञानावच्छिन्नचैतन्यस्यैव आकाशादिप्रपञ्च-जनकत्वमितिभावः ।

अस्मिन्नर्थे श्रुतिं प्रमाणयति । तस्माद्वेत्यादि । एतेनार्थात् साङ्ख्य-नैयायिकपक्षौ निरस्तौ, शक्तेरज्ञानस्य शक्तिमत्परतन्त्रत्वात्, स्वतन्त्रस्य तस्य केवलस्य जड़स्याज्ञानस्य जगत्कारणत्वानुपपत्तेः, ईक्षतेर्नाशब्दं, रचनानुपपत्तेश्च नानुमानमित्यादिन्यायनिरस्तत्वाच्च, परमाणोरप्रत्यक्षदोष-प्रसक्तत्वासाधनापायात्, अभिन्ननिमित्तोपादानप्रतिपादकश्रुतिस्मृतिन्याय-विरोधाच्च । यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, सदेव सोम्येदमग्र आसीत्, एतस्माज्जायते प्राणः, अहं सर्वस्य प्रभवो-मत्तः सर्वं प्रवर्त्तते । बीजं मां सर्वभूतानामित्यादिश्रुतिस्मृतिभिरीश्वर-स्यैव जगत्कारणत्व प्रतिपादनात् ।

नन्वाकाशादिप्रपञ्चोत्पादकचैतन्यावच्छेदकाज्ञाने कुतस्तमः प्राधान्य-मित्याशङ्क्याह । तेजोवित्यादि । कारणगुणाहि कार्य गुणानारभन्ते इति न्यायादिति भावः ।

ननु त्रिगुणात्मकत्वादज्ञानस्य कथं तमोगुणमात्रप्राधान्येन आका-शादिजनकत्वमित्याशङ्क्याह । तदानीमिति । तस्यामुत्पत्तिवेलायां सत्त्वादयस्त्रयोऽपि गुणास्तारतम्येन कारणगुणक्रमन्यायेन तेजआकाशादिषु पञ्चभूतेष्वुत्तरोत्तराधिक्येन जायन्ते इत्यर्थः ।

इमान्येव सूक्ष्मशरीरादिकारणभूतान्यपञ्चीकृतानि सूक्ष्मरूपपञ्च-भूततन्मात्राणीत्युच्यन्ते इत्याह । इमान्येवेति ।

पञ्चप्राणमनोबुद्ध्यादशेन्द्रिय समन्वितम् । अपञ्चीकृतभूतोत्थं सू-क्ष्माङ्गं भोगसाधनम् । इति वचनादपञ्चीकृतभूतेभ्यः अपञ्चीकृत-सूक्ष्मशरीराणि पञ्चीकृतस्थूलभूतेभ्यः स्थूलशरीराणि चोत्पद्यन्ते इ-त्याह एतेभ्य इति ।

सूक्ष्मशरीरस्वरूपभूतानवयवानाह । अवयवास्त्विति ।

सात्त्विकांशादाकाशात् श्रोत्रमुत्पद्यते, सात्त्विकांशाद्वायोस्त्वगिन्द्रियं,

सात्त्विकांशात्तेजसं चक्षुः, सात्त्विकांशात् जलात् जिह्वा, सात्त्विकांशायाः पृथिव्या घ्राणेन्द्रियञ्चेति क्रमेणोत्पद्यन्ते इत्याह । एतानीति ।

बुद्धेर्लक्षणमाह । बुद्धिरिति । ब्रह्मैवाहमिति निश्चयात्मिकैवान्तःकरणवृत्तिरेव बुद्धिः ।

मनसोलक्षणमाह । मन इति । अहं चिद्रूपो देहोवेति संशयात्मिकान्तःकरणवृत्तिरेव मन इत्यर्थः ।

स्मरणात्मकचित्तस्य गर्वात्मकाहङ्कारस्य च बुद्धिमनसोरन्तर्भाव इत्याह । अनयोरिति । यद्यप्यन्तःकरणत्वेन चतुर्णामेकत्वं तथाप्येकस्यैव पुरुषस्य पाचकः पाठक इत्यादिवृत्तिभेदात् भेदवत् एकस्यान्तःकरणस्य निश्चयसंशयस्मरणाहङ्कारविषयभेदैर्बुद्ध्यादिभेद इत्यर्थः ।

बुद्ध्यादीनामुत्पत्तिप्रकारं दर्शयति । एते पुनरिति ।

एतेषां चतुर्णां सात्त्विकांशेभ्योभूतेभ्य उत्पत्तौ निमित्तमाह । एतेषामिति । बुद्ध्यादीनां प्रकाशात्मकत्वात् सात्त्विकांशभूतकार्यत्वमित्यर्थः ।

बुद्धेर्विज्ञानमयकोशत्वं दर्शयति । इयमिति । बुद्धेः सत्त्वकार्यत्वात् ज्ञानेन्द्रियसाक्षित्वेन प्रकाशाधिक्यात् विज्ञानमयत्वं, आत्माच्छादकत्वाच्च कोशत्वं इत्यर्थः ।

विशुद्धबुद्धिप्रतिबिम्बितचिदात्मनो जीवत्वं दर्शयति । अयमिति ।

तत्प्रायः पिण्डवत् बुद्ध्यारोपितं चैतन्यं वस्तुतोऽकर्तृ अभोक्तृ नित्यानन्दपरिच्छिन्नमक्रियमपि कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वपरिच्छिन्नत्वक्रियावत्त्वाद्यभिमानेन स्वर्गादिलोकान्तरगामित्वं व्यावहारिकजीवत्वञ्च लभते इत्यर्थः ।

मनोमयकोशं निरूपयति । मनश्चेति । सत्त्वगुणप्रधानं मनः रजोगुणांशेभ्यो जातैर्यागादिकर्मेन्द्रियैरेव सहितं सत् मनोमयकोशोभवतीत्यर्थः । अत्र तु मनसः सत्त्वोपचितरजोविकारेच्छारूपत्वात् सङ्कल्पविकल्पात्मकत्वेन बुद्ध्यपेक्षया जाड्याधिक्यात् मनोमयत्वं, आत्माच्छादकत्वात् कोशत्वमिति भावः ।

कर्मेन्द्रियाण्युद्दिशति। कर्मेन्द्रियाणीति। एतेषामुत्पत्तौ साधनापेक्षायामाह। एतानीति। भूतानां त्रिगुणत्वेऽपि रजोगुणबहुलेभ्योभूतेभ्यो वागादीनि पृथक् पृथक् क्रमेण उत्पद्यन्ते। रजोगुणप्रधानादाकाशात् वागुत्पद्यते, रजोगुणप्रधानाद्वायोः पाणीन्द्रियं, रजोगुणप्रधानादग्नेः पादेन्द्रियं, रजोगुणप्रधानात् जलात् पायविन्द्रियं, रजोगुणप्रधानायाः पृथिव्याः उपस्थेन्द्रियं उत्पद्यते इत्यर्थः।

वायूनुद्दिशति। वायव इति।

वयोर्द्वयं प्राणस्य लक्षणमाह। प्राण इति। ऊर्ध्वगमनशीलोनासाग्रस्थायी वायुः प्राण इत्यर्थः।

अपानस्य लक्षणमाह। अपान इति। अधोगमनशीलः पायवादिस्थायी वायुरपान इत्यर्थः।

व्यानस्य लक्षणमाह। व्यान इति। सर्वनाड़ीगमनशीलोऽखिलशरीरस्थायी वायुर्व्यान इत्यर्थः।

उदानस्य लक्षणमाह। उदान इति। ऊर्ध्वोत्क्रमणशीलः कण्ठस्थायी वायुरुदान इत्यर्थः।

समानस्य लक्षणमाह। समान इति। शरीरमध्यगताञ्चरसादिनेता वायुः समान इत्यर्थः। प्राणादीनां वायुत्वेन क्रमेण एकत्वेऽपि क्रियाभेदेन भेद इत्यर्थः।

कपिलमतानुसारिणः। क्रियाभेदेनान्येऽपि पञ्च वायवः सन्तीति वदन्तीत्याह। केचिच्चिति।

नान्येव नामानि निर्दिशति। नाग इत्यादि। तथा चोक्तं, उद्गारे नाग आख्यातः कूर्मस्तून्मीलने स्मृतः। कृकरस्तु क्षुति ज्ञेयो देवदत्तो विजृम्भने। न जहाति मृतञ्चापि सर्वव्यापी धनञ्जयः इति।

वेदान्तिनस्तु नागादीनां प्राणादिष्वन्तर्भावं वदन्तीत्याह। एतेषामिति।

प्राणादिवायूनामुत्पत्तौ कारणापेक्षायामाह। इदमिति। अपञ्चीकृतपञ्चमहाभूतेभ्योरजः प्रधानेभ्यः प्राणादयो जायन्ते इत्यर्थः।

एतेषां प्राणादीनां प्राणप्राचुर्यात् प्राणमयत्वं, आत्माच्छादकत्वात्

कोषत्वञ्च भवतीत्याह। इदमिति।

प्राणादीनां रजःप्रधानभूतकार्य्यत्वे निमित्तमाह। अस्येति। प्राणादीनां क्रियात्मकत्वात् रजोऽंशकार्य्यत्वमित्यर्थः।

एतेषु पञ्चसु कोषेषु मध्ये विज्ञानमयमनोमयप्राणमयकोषाणां क्रमेण ज्ञानेच्छाक्रियाशक्तिभेदेन कर्त्तृकरणक्रियारूपत्वं दर्शयति। एतेष्विति।

तत्र हेतुमाह। योग्यत्वादिति। इदमेव कोषत्रयं सूक्ष्मशरीरमिति व्यवह्रियते इत्यर्थः।

अस्य समष्टित्वे हेतुमाह। अत्रापीति। एकबुद्धीति, चराचर प्राणिमात्रस्य यावन्त्यनन्तानि सूक्ष्मशरीराणि तेषां सर्वेषां सूक्ष्मशरीराणां सूत्रात्मना हिरण्यगर्भाख्येन स्वीयैकबुद्ध्या विषयीकृतत्वात् समष्टिरित्यर्थः।

अत्र दृष्टान्तमाह। वनवदित्यादि।

अस्यैव सूक्ष्मशरीरस्य व्यष्टित्वं दर्शयति। अनेकेत्यादि। अनेकेषां जीवानां प्रत्येकं स्वस्वलिङ्गशरीरस्य स्वस्वबुद्धिविषयत्वेनानेकबुद्धिविषयतया व्यष्टित्वमित्यर्थः।

तत्र दृष्टान्तमाह। वृक्षवदित्यादि।

उक्तसमष्ट्यवच्छिन्नचैतन्यस्य सूत्रात्मेत्यादिसंज्ञां प्रदर्शयति। एतदित्यादि।

तत्र हेतुमाह। सर्व्वेति। सर्वप्राणिलिङ्गशरीरेषु अनुस्यूतत्वाद्विद्यमानत्वादित्यर्थः।

हेत्वन्तरमाह। ज्ञानेच्छेत्यादि। ज्ञानेच्छाक्रियाशक्तिमत्कोषत्रयोपाध्यवच्छिन्नत्वादित्यर्थः।

विज्ञानमयादिकोषत्रयस्य सूक्ष्मशरीरतां दर्शयति। अस्येत्यादि। अस्य सूत्रात्मनोहिरण्यगर्भाख्यस्य विज्ञानमयादिकोषत्रयं सूक्ष्मशरीरं अस्य स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वादित्यर्थः।

अस्यैव विज्ञानमयादिकोषत्रयस्य स्वप्नत्वे युक्तिमाह। जाग्रदि-

त्यादि । विराड्भोगानुभूतस्थूलप्रपञ्चविषयकवासनामयत्वात् स्वप्नत्वमस्ये-त्यर्थः । यतः स्वप्नत्वं सूक्ष्मत्वञ्च अतएव स्थूलप्रपञ्चलयस्थानमित्युच्यते इत्यर्थः ।

विज्ञानमयादिसमष्ट्युपाध्यवच्छिन्नचैतन्यस्य हिरण्यगर्भत्वं प्रतिपाद्य इदानीं तद्व्यष्ट्युपलक्षितचैतन्यस्य तैजसत्वं निरूपयति । एतदित्यादि ।

तत्र हेतुमाह । तेजोमयेत्यादि ।

तैजसस्यापि सूक्ष्मशरीरत्वमिति दर्शयति । अस्यापीति ।

सूक्ष्मशरीरत्वे हेतुमाह । स्थूलेति ।

अस्याः स्वप्नत्वे हेतुमाह । जायदित्यादि । विश्वचैतन्येनानुभूत-स्थूलशरीरविषयकवासनामयत्वात् स्वप्नत्वमित्यर्थः ।

अस्यैव सूक्ष्मशरीरस्य स्थूलशरीरलयस्थानत्वे युक्तिमाह । अत-एवेति ।

यथा पूर्वं प्राज्ञेश्वरावज्ञानवृत्तिभिः सुषुप्त्यवस्थायामानन्दमनुभवतः तथा हिरण्यगर्भतैजसावपि स्वप्नावस्थायां मनोवृत्तिभिः वासनामयान् शब्दादिविषयाननुभवतइति दर्शयति । एतावित्यादि ।

अत्रार्थे श्रुतिमुदाहरति । प्रविविक्तेत्यादि ।

इहापि विज्ञानमयादिकोषत्रयस्य समष्टिरूपस्य तदवच्छिन्नसूत्रात्म-नश्च व्यष्टिरूपविज्ञानमयादिकोषत्रयस्य तदवच्छिन्नतैजसचैतन्यस्य च घनवृक्षादितदवच्छिन्नाकाशादिदृष्टान्तमुखेनाभेदं दर्शयति । अत्रापी-त्यादि । समष्टिव्यष्ट्युपाधेर्व्यष्टित्ववत् जलाशयजलवच्चाभेदः उपाधिद्व-यावच्छिन्नचैतन्ययोः सूत्रात्मतैजसयोरपि घनवृक्षावच्छिन्नाकाशवत् जला-शयजलगतप्रतिबिम्बाकाशवच्चाभेदः इत्यर्थः ।

सूक्ष्मशरीरोत्पत्तिप्रकरणमुपसंहरति । एवमित्यादि ।

अथेदानीं स्थूलशरीरोत्पत्तिं निरूपयितुमुपक्रमते । स्थूलेत्यादि । तुशब्दः पूर्वस्माद्वैलक्षण्यं द्योतयति । पञ्चीकृतानीति । अपञ्चीकृतसूक्ष्म-भूतापेक्षया स्थूलभूतानि पञ्चीकृतानीत्यर्थः ।

पञ्चीकरणमेव प्रतिपादयितुं प्रतिजानीते । पञ्चीकरणन्विति ।

पञ्चीकरणप्रकारमेवाह। आकाशादिपञ्चखित्यादि। अयमर्थः सृष्टिकाले सकलप्राण्यदृष्टवशादीश्वरप्रेरणया आकाशवायुतेजोवन्ह्यविद्यासहायभूतात् परमात्मनः सकाशादनुक्रमजातानि तान्यपञ्चीकृतानि सूक्ष्माणि व्यवहारासमर्थानीति कृत्वा तदीयस्थौल्यापेक्षायां व्यवहर्तृप्राणिजातधर्माधर्मापेक्षयैव तान्येव भूतानि पञ्चीकृतानि भवन्ति। तानि च प्रत्येकं द्वैविध्यमापद्यन्ते तेष्वाकाशादिषु दशसु भागेषु प्राथमिकान् पञ्च भागान् प्रत्येकं चतुर्धा समं विभज्य स्वार्द्धपरित्यागेन चतुर्णां प्रत्येकं भागान्तरेषु सन्निवेशेन पञ्चीकृतानि स्थूलानि भवन्तीति।

अस्मिन्नर्थे वृद्धसम्मतिमाह। तदुक्तमित्यादि।

पञ्चीकरणस्य त्रिवृत्करणप्रतिपादकश्रुत्यन्तरविरोधमाशङ्क्य परिहरति। अत्रेत्यादि। भूतत्रयसृष्टिश्रुतौ सृष्टिपरिपूर्त्त्यर्थमत्रास्तुतमपि भूतद्वयमाश्रित्य भूतपञ्चकाभिप्रायेण भूतत्रयसृष्टिप्रतिपादनादविरोधइत्यर्थः।

आकाशादिपञ्चभूतेषु चतुर्धा विभक्तानामन्येषां पञ्चभूतानां प्रत्येकानुप्रवेशेन पञ्चकृतानामाकाशादीनां पञ्चात्मकत्वाविशेषादाकाशादिव्यपदेशो न स्यादित्याशङ्क्य परिहरति। पञ्चानामित्यादि। आकाशादीनां पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु पञ्चभूतेषु तद्विशेषानुप्रवेशात् तत्तन्नामभिर्व्यवहारः सम्भवतीत्यर्थः।

यदा पञ्चीकृतान्याकाशादीनि तदानीं स्थूलत्वेन स्वस्वकार्योत्पादनसमर्थत्वादाकाशेऽव्यक्तरूपेण स्थितः शब्दोऽभिव्यज्यते व्यक्तोभवतीत्यर्थः।

उक्तेभ्योभूतेभ्यश्च चतुर्दशभुवनोत्पत्तिप्रकारं दर्शयति। एतेभ्यइति। एतेभ्योभूतेभ्यः सप्तसप्तब्रह्माण्डस्थचतुर्विधशरीराणाञ्च तद्योग्याचपानादीनाञ्चोत्पत्तिर्भवतीत्यर्थः।

चतुर्विधशरीराण्युद्दिशति। चतुर्विधेत्यादि।

तानि च यवोद्देशं विवृणोति। जरायुजानीत्यादि।

पूर्ववदत्रापि समष्टिव्यष्टिभेदं दर्शयति। अत्रापीत्यादि। चतुर्विधशरीरजातमपि शरीरमित्येकबुद्धिविषयतया वनवत् समष्टित्वं,

प्रत्येकं तच्छरीरविषयतयानेकबुद्धिविषयत्वात् व्यष्टित्वं लभते इत्यर्थः ।

अधुना भूरादिचतुर्दशभुवनान्तर्गतचतुर्विधस्थूलशरीरसमष्ट्युपहितचैतन्यस्य वैश्वानरत्वापरपर्यायवैराजत्वं दर्शयति । एतदित्यादि ।

तत्र युक्तिमाह । सर्व्वेत्यादि । सर्व्वप्राणिनिकायेष्वहमित्यभिमानत्वात् वैश्वानरत्वं, विविधं नानाप्रकारेण प्रकाशमानत्वाच्च वैराजत्वं लभते इत्यर्थः ।

अस्य विराट्चैतन्यस्य एषा पूर्व्वोक्ता ब्रह्माण्डान्तर्गततुर्व्विधस्थूलशरीरसमष्टिरेव स्थूलशरीरमित्यर्थः । अत्रविकारवाङ्मात्रादन्नमयत्वं, आच्छादकत्वात् कोषत्वं, स्थूलशरीरादिविषयप्रयुक्तसुखदुःखभोगायतनत्वाच्च स्थूलशरीरत्वं, इन्द्रियैरर्थोपलब्धेश्च जाग्रदवस्थात्वं घटते इत्यर्थः ।

चतुर्व्विधस्थूलशरीरसमष्ट्युपहितचैतन्यं सप्रपञ्चमभिधाय इदानीं तदष्ट्युपहितचैतन्यमभिधत्ते । एतदित्यादि । एतेषां चतुर्व्विधशरीराणां या व्यष्टिस्तच्छरीरव्यक्तिस्तदुपहितं चैतन्यं विश्वइत्युच्यते इत्यर्थः ।

तत्र हेतुमाह । सूक्ष्मेत्यादि । सूक्ष्मलिङ्गशरीराभिमानमपरित्यज्य स्थूलशरीरेषु प्रविश्य तत्तत्स्थूलशरीरेषु सर्व्वेषु प्रत्येकमहमित्यभिमानवत्त्वाद्विश्वमित्यर्थः ।

अस्य विश्वचेतनस्याप्येषा तत्तच्छरीरव्यक्तिविशेषलक्षणा व्यष्टिः सैव स्थूलशरीरमित्यर्थः ।

अत्रान्नविकारवाङ्मात्रादन्नमयत्वं चैतन्याच्छादकत्वात् कोषत्वं, इन्द्रियैरर्थोपलम्भात् जाग्रत्त्वञ्च क्रमेण दर्शयति । अत्रेत्यादि ।

अधुना जाग्रदवस्थायां विश्ववैश्वानरयोस्तत्तद्देवताधिष्ठितश्रोत्रादिभिश्चतुर्दशभिः करणैः शब्दादिविषयग्रहणप्रकारं दर्शयति । तदानीमित्यादि ।

अस्मिन्नर्थे श्रुतिं सम्वादयति । जागरितेत्यादि ।

अनयोर्विश्ववैश्वानरयोर्वनतृक्षावच्छिन्नाकाशदृष्टान्तेन जलाशयजलगतप्रतिबिम्बाकाशदृष्टान्तेन च पूर्ववदभेदं साधयति । अत्रापीत्यादि ।

स्थूलप्रपञ्चोत्पत्तिमुपसंहरति। एवमित्यादि।

स्थूलसूक्ष्मकारणप्रपञ्चानां व्यष्टिभूतानां प्रत्येकविवक्षयाऽवान्तरप्रपञ्चत्वमभिधायेदानीं तेषां समष्टेरेव महाप्रपञ्चत्वं दर्शयति। एवमित्यादि।

अत्र दृष्टान्तमाह। यथेत्यादि। यथा धवखदिरपलाशाद्यवान्तरवनानां समष्टिः समुदायविवक्षया एकं महद्वनं भवति यथा वापीकूपतडागाद्यवान्तरजलाशयानां समुदायविवक्षया एकोमहान् जलाशयोभवति तथा स्थूलसूक्ष्मकारणावान्तरप्रपञ्चानां समुदायः एकोमहान् प्रपञ्चोभवतीत्यर्थः।

एतद्वान्तरमहाप्रपञ्चोपहितानां विश्वतैजसप्राज्ञानां वैश्वानरहिरण्यगर्भाव्याकृतानांस्वावान्तरवनायच्छिन्नाकाशवत् अवान्तरजलाशयजलगतप्रतिबिम्बाकाशवच्चाभेदमाह। एतदुपहितमित्यादि।

चैतन्यप्रपञ्चयोर्भेदे सर्वं खल्विदं ब्रह्मेति श्रुत्या विरोधमाशङ्क्य परिहरति। आभ्यामित्यादि। उक्तमहत्प्रपञ्चतदवच्छिन्नचैतन्याभ्यां तत्प्रायःपिण्डवदन्योन्यतादात्म्याध्यासापन्नं यद्वस्तु श्रुतं तदवच्छिन्नं चैतन्यं सर्वं खल्विदं ब्रह्मेति महावाक्यस्य वाच्यं भवति, अन्योन्यतादात्म्याध्यासानापन्नञ्च सत् लक्ष्यं भवतीत्यर्थः।

अध्यारोपप्रकरणमुपसंहरति। एवमित्यादि।

ईश्वरचैतन्ये साभान्यतो महाप्रपञ्चाध्यारोपप्रकारं प्रपञ्चमभिधायेदानीं प्रत्यगात्मनि विशेषाध्यारोपप्रकारं दर्शयितुमुपक्रमते। इदानीमित्यादिना।

अध्यारोपमेवाह। इदमिति। प्रत्यक्षादिसन्निहितस्यापत्यादिधर्मिणः इदमा निर्देश्यः क्रियते। इदमिदमित्यादेरेव धीप्सा। तथा च अतिस्थूलबुद्धिस्तु इदमपत्यादिकमेवाहं अयं, पुत्रएवाहमित्यन्तं बाह्यधर्मान् विशेषेणात्मन्यध्यारोपयतीत्यर्थः।

अत्र श्रुतिमाह। आत्मेत्यादि।

तत्र युक्तिमाह। स्वस्मिन्नित्यादि। यथा स्वशरीरे प्रेमदर्शनाद्-

त्मत्वभ्रमः एवं पुत्रादीनां शरीरेऽपि प्रेमदर्शनात् आत्मत्वभ्रमइत्यर्थः ।

अत्रानुरूपमनुभवमाचष्टे । पुत्रइति ।

एतदपेक्षया विशिष्टबुद्धिः अन्यः कश्चिदधिकारी स्वदेहमेवात्मानं मन्यते इत्याह । चार्वाकइति ।

अत्रापि श्रुतिमाह । संवा इत्यादि ।

पुत्रादिशरीरस्यात्मत्वाभावे युक्तिं दर्शयन् पूर्वोक्ताधिकारिणः सकाशात् स्वस्य वैलक्षण्यं दर्शयति । प्रदीप्तेत्यादि ।

देहस्यात्मत्वे अनुभवञ्च दर्शयति । स्थूलोऽहमित्यादि ।

ततोऽप्युत्कृष्टः कोऽप्यधिकारी श्रुतियुक्त्यनुभवेभ्यः इन्द्रियाण्यात्मेति वदतीत्याह । अपरइत्यादि ।

अतोऽप्युत्तमोऽधिकारी कश्चित् श्रुतिप्रमाणानुभवबलात् प्राणएवात्मेत्याह । अन्यइति ।

ततोविशिष्टाधिकारी कश्चित् स्वमतानुकूलश्रुत्यादिबलात् मनएवात्मेत्याह । इतरइति ।

उक्तेभ्यः पञ्चभ्योविलक्षणः कश्चिद्विज्ञानवादी श्रुत्यादिभिर्विज्ञानमात्मेत्याह । बौद्धइति ।

उक्तेभ्योऽतिरिक्तौ प्राभाकरतार्किकौ स्वमतोपयोगिश्रुत्यादिबलात् अज्ञानमात्मेति वदतइत्याह । प्राभाकरइत्यादि ।

अज्ञानावच्छिन्नं चैतन्यमात्मेत्याह । प्रज्ञानघनइत्यादि ।

बौद्धैकदेशी कश्चित् श्रुत्यादिभिः शून्यमात्मेति वदतीत्याह । अपरइति ।

अधुना पुत्रादिशून्यपर्यन्तानामात्मत्वप्रतिपादकश्रुत्यादेराभासमात्रत्वात् पूर्वपूर्वमतस्योत्तरोत्तरमतबाध्यत्वाच्च दृश्यत्वजडत्वादिहेतुकदृश्यकत्वं चानात्मत्वं प्रसिद्धमेवेति प्रतिपादयितुं प्रतिजानीते । एतेषामित्यादि ।

पुत्राद्यात्मत्वादिनामतिमन्दाधिकारित्वात् तत्प्रतिपादितश्रुत्यादेरपि पूर्वपूर्वस्योत्तरोत्तरबाध्यत्वात् पुत्रादिशून्यान्तानामनात्मत्वं प्रसिद्धमेवेति प्रतिज्ञातमेवार्थं प्रकटयति । एतैरित्यादि ।

ननु पुत्रादिस्मृत्यपर्य्यन्तानामनात्मत्वे सिद्धे कस्त्वंहं प्रत्ययविषय आत्मेत्याशङ्क्याऽस्थूलादिनिषेधवाक्यजातबोधितं सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिविधिवाक्यकोटिबोधितं यत् सत्यं ज्ञानमनन्तानन्दाद्वयं ब्रह्म तदेवाऽहमात्मत्वमिति प्रबलश्रुतियुक्त्यनुभवैः प्रतिपादयितुमाह। किञ्चेत्यादि। अस्थूलादिप्रबलश्रुतिवाक्यैः पुत्रादिस्मृत्यन्तात्मातिरिक्तात्मस्वरूपप्रतिपादनात् पुत्रादीनां जड़त्वादिहेतुभिरनात्मत्वमित्यर्थः।

अस्मिन्नर्थे प्रबलविद्वदनुभवं प्रमाणयति। अहमित्यादि।

पुत्रादिस्मृत्यादीनां दौर्ब्बल्यं च दर्शयति। तत्तदित्यादि।

यतः पुत्रादीनां जड़त्वादिहेतुभिरनात्मत्वं अतः पुत्रादिभासकं नित्यशुद्धत्वादिस्वरूपमेवात्मवस्तु इत्यर्थः।

नन्विदं विरुद्धं यत् पुत्रादीनामात्मत्वप्रतिपादकश्रुतीनामप्रामाण्यं अस्थूलादिश्रुतीनां प्रामाण्यमिति 'न हि वेदान्तवाक्येषु केषाञ्चिदप्रामाण्यं केषाञ्चित् प्रामाण्यं इति शक्यं प्रतिपादयितुं, एवञ्चेत् पुत्रादिश्रुतीनां प्रामाण्यं अस्थूलादिश्रुतीनामप्रामाण्यमिति वैपरीत्यं किं न स्यात् वेदवाक्यत्वाविशेषात्, किं केषाञ्चिद्वेदान्तवाक्यानामप्रामाण्यं केषाञ्चित् प्रामाण्यमिति प्रतिपादनार्थमिदं प्रकरणमारब्धं, ततः कथं निर्णयइतिचेत्, उच्यते, पुत्रादिश्रुतीनां सर्व्वथैव प्रामाण्यं नास्तीति न निषिध्यते, किन्तु अस्थूलादिप्रबलश्रुतिन्यायविरोधात् स्वार्थे तात्पर्य्याभावात् तेषां स्थूलारुन्धतीन्यायेन पूर्वपूर्वनिराकरणद्वारा सूक्ष्मसूक्ष्मवस्तूपदेशे तात्पर्य्यमित्येवायदेव प्रतिपाद्यते। तथा हि ध्रुवमरुन्धतीञ्च दर्शयतीति विधिबलात् वरवध्वोररुन्धतीदर्शने प्राप्ते परमसूक्ष्मरूपाया अरुन्धत्याः प्रथमकक्षायामेव प्रतिपत्तुमशक्यत्वात् प्रथमं चन्द्रज्योतीरूपारुन्धतीत्युच्यते, ततश्चन्द्रभिन्ना तारकारुन्धतीत्युच्यते, ततश्चेतरतारकाभिन्ना सप्ततारकात्मिकारुन्धतीत्युच्यते, तदनन्तरमितरतारकाचतुष्टयभिन्ना नारकात्मितयात्मिकेत्युच्यते, ततस्तन्मध्यतारकेत्युच्यते, ततस्तत्समीपवर्त्तिनी परमसूक्ष्मारुन्धतीत्युच्यते। न चैतावतैतेषां पञ्चानां वाक्यानां परस्परविरुद्धार्थप्रतिपादकत्वेन अप्रामाण्य

शक्यं प्रतिपादयितुं, किन्तु प्रतिपत्तृबुद्ध्यनुसारेण सोपानक्रमवत् पूर्वपूर्व-निराकरणद्वारासूक्ष्मारूढतीप्रतिपादने तात्पर्यम् । तद्यदत्रापि अन्न-मयः प्राणमयः मनोमयः विज्ञानमयः आनन्दमयः आत्मा ब्रह्म पुच्छं प्रतिष्ठेति पुच्छब्रह्मपर्यवसितानां पञ्चकोषवाक्यानामपि परस्परविरुद्धार्थ-प्रतिपादकत्वेऽपि प्रतिपत्तृबुद्ध्यनुसारेण सोपानक्रमवत् पूर्वपूर्वनिराकरण-द्वारा परमसूक्ष्मपुच्छब्रह्मप्रतिपादने तात्पर्यम् । तस्मात् सर्वेषां वेद-वाक्यानां साक्षात्परम्परया वा अद्वितीयवस्तुप्रतिपादने तात्पर्यात् प्रामाण्याविरोधः इति संक्षेपः ।

P.18, L2 (text)

विशेषाध्यारोपप्रकरणमुपसंहरति । एवमित्यादि ।

आत्मवस्तुनि मिथ्याप्रपञ्चस्य सामान्यतो विशेषतश्चाध्यारोपप्रकरणं सप्रपञ्चमभिधायेदानीं तदपवादप्रकारं वक्तुमारभते । अपवादो नामेति ।

असङ्गोदासीने परमात्मवस्तुनि तद्विवर्तभूताज्ञानादिमिथ्याप्रपञ्चस्य चिद्वस्तुमात्रावशेषतयावस्थानमेवापवादः इति वक्तुं प्रथमं लौकिकं दृष्टान्तमाह । रज्जुविवर्तस्येति । रज्जुस्वरूपापरित्यागेन सर्पाकारेण भासमानस्य रज्जुविवर्तस्यापवादो नाम योऽधिष्ठानरज्जुमात्रतया अवस्थानवत् चिद्विवर्तस्याज्ञानादिप्रपञ्चस्य नाम चिन्मात्रत्वेनावस्थानमित्यर्थः । अत्र यथास्वरूपेणावस्थितस्य वस्तुनोऽन्यथाभावो द्विधा भवति । परिणामभावोविवर्तभावश्चेति । तत्र परिणामभावोनाम वस्तुनोयथार्थतः स्वस्वरूपं परित्यज्य स्वरूपान्तरापत्तिः, यथा दुग्धमेव स्वस्वरूपं परित्यज्य दध्याकारेण परिणमते । विवर्तभावस्तु वस्तुनः स्वस्वरूपापरित्यागेन स्वरूपान्तरेण मिथ्याप्रतीतिः, यथा रज्जुस्वरूपा-परित्यागेन सर्पाकारेण मिथ्याप्रथीयते । तत्र वेदान्ते ब्रह्मणि प्रपञ्च-ज्ञानस्य परिणामभावो नाङ्गीक्रियते, दुग्धादिवद्ब्रह्मणोऽपि विकारित्वप्रस-ङ्गादनित्यत्वादिदोषापत्तेः, विवर्तभावाङ्गीकारे तु नायं दोषः ब्रह्मणि प्रपञ्चभानस्य मिथ्यात्वेन विकारित्वाभावात् । तदुक्तं, अधिष्ठानावशेषोहि भ्रमः कल्पितवस्तुनइति । तस्माच्चिद्विवर्तस्य प्रपञ्चस्य चिन्मात्रावस्थान-मेवापवादः इति भावः ।

तस्मिन् व्याख्यानरूपं ग्रन्थं दर्शयति । तदुक्तमित्यादि ।

सामान्यतो दर्शितमपवादन्यायं विस्तरेण प्रतिपादयितुं प्रतिजानीते । तथाहीति ।

स्थूलसूक्ष्मकारणप्रपञ्चानामुत्पत्तिविपरीतक्रमेण तत्तत्कारणरूपेणावस्थानमेवापवादः इत्याह । एतदित्यादि । एतत् स्थूलशरीरं स्वावयवपञ्चाण्डसहितं स्वकारणभूतेषु पञ्चीकृतेषु पञ्चमहाभूतेषु लीनं सत् तन्मात्रत्वावतिष्ठते, तानि च पञ्चीकृतानि भूतानि शब्दादिसहितानि स्वप्रदशावयवात्मकलिङ्गशरीराणि स्वकारणेऽपञ्चीकृतभूतेषु लीनानि भवन्ति, तान्यपञ्चीकृतानि सत्त्वादिगुणसहितानि स्वकारणाज्ञानोपहितचैतन्ये लीनानि भवन्ति, तज्ज्ञानं तत्पर्यन्तं चेतनं सर्वज्ञत्वादिविशिष्टञ्च स्वाधारभूतानुपहितचैतन्ये लीनं भवति चैतन्यमेवावशिष्यते इत्यर्थः ।

फलितमाह । आभ्यामित्यादि ।

तत्त्वम्पदार्थशोधनप्रकारं प्रतिजानीते । तथाहीत्यादि । अज्ञानं तदवच्छिन्नेश्वरचैतन्यं तदनुपहितचैतन्यञ्च एतत्त्रयं तत्त्रायः पिण्डवदन्योन्यतादात्म्याध्यासेन एकत्वेन प्रतीयमानं सत् तत्पदवाच्यार्थो भवतीत्यर्थः ।

तत्पदलक्ष्यार्थमाह । एतदित्यादि । अज्ञानावच्छिन्नेश्वरचैतन्यस्याधारभूतं यदनुपहितचैतन्यं, तत् तावत् विवक्षितं सत् भेदविवक्षया तत्पदलक्ष्यार्थोभवतीत्यर्थः ।

त्वम्पदवाच्यार्थमाह । अज्ञानादीत्यादि । व्यष्टिभूतमज्ञानं यदन्तःकरणं तदवच्छिन्नं जीवचैतन्यं तदनुपहितचैतन्यञ्च एतत्त्रयं तत्त्रायःपिण्डवत् परस्परतादात्म्याध्यासेनाभेदविवक्षया त्वम्पदवाच्यार्थोभवतीत्यर्थः ।

त्वंपदलक्ष्यार्थमाह । एतदित्यादि । अन्तःकरणोपहितचैतन्यस्याधारभूतं यदनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं तत् त्वंपदलक्ष्यार्थोभवतीत्यर्थः ।

पदार्थमभिधाय वाक्यार्थं वक्तुमुपक्रमते । अथेत्यादि ।

ननु जीवेश्वरयोः किञ्चिज्ज्ञत्वसर्वज्ञत्वादिविशिष्टयोरत्यन्तविलक्षणयोः तत्त्वमस्यादिमहावाक्यानि परस्परविरुद्धार्थप्रतिपादकानि कथमखण्डै-

करसं ब्रह्म प्रतिपादयन्तीत्याशङ्क्य साक्षादैक्यप्रतिपादकत्वाभावेऽपि लक्षणया सम्बन्धत्रयेणाखण्डैकार्थं प्रतिपादयन्तीत्याह । इदमित्यादि ।

सम्बन्धत्रयस्वरूपमाह । सम्बन्धत्रयमित्यादि ।

पदार्थप्रत्यगात्मनां सम्बन्धत्रयसद्भावे दृढसम्भावनामाह । तदुक्तमित्यादि ।

पदयोः सामानाधिकरण्यं उदाहरणनिष्ठं कृत्वा दर्शयति । सामानाधीत्यादि । भिन्नप्रवृत्तिनिमित्तयोः शब्दयोः एकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं, तच्च सोऽयं देवदत्तइतिवाक्ये स इति तत्पदस्य तत्कालतद्देशवैशिष्ट्यं प्रवृत्तिनिमित्तं, एतत्कालैतद्देशवैशिष्ट्यं अयंशब्दप्रवृत्तिनिमित्तं, तथाच भिन्नप्रवृत्तिनिमित्तयोः सोऽयं शब्दयोः एकस्मिन् देवदत्तपिण्डे तात्पर्यसम्बन्धः सामानाधिकरण्यमित्यर्थः ।

उक्तमर्थं दार्ष्टान्तिके योजयति । तथेत्यादि । तथा तत्त्वमसीति वाक्येऽपि परोक्षत्वसर्वज्ञत्वादिवैशिष्ट्यं तत्पदप्रवृत्तिनिमित्तं, अपरोक्षत्वकिञ्चिज्ज्ञत्वादिवैशिष्ट्यं त्वंपदप्रवृत्तिनिमित्तं, तथा च भिन्नप्रवृत्तिनिमित्तयोस्त्वम्पदयोरेकस्मिन् चैतन्ये तात्पर्यसम्बन्धः सामानाधिकरण्यमित्यर्थः ।

विशेषणविशेष्यभावसम्बन्धस्वरूपमाह । विशेषणेत्यादि । व्यावर्त्तकं विशेषणं व्यावर्त्यं विशेष्यम् । तथा च यथा सोऽयं देवदत्त इति वाक्ये एव अयं शब्दवाच्यो योऽसौ एतत्कालैतद्देशसम्बन्धविशिष्टो देवदत्तपिण्डः अयं सः इति तच्छब्दवाच्यात् तत्कालतद्देशविशिष्टदेवदत्तपिण्डात् भिन्नो न इति यदा प्रतीयते तदा तच्छब्दार्थस्य अयं शब्दवाच्यार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वं, अयं शब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वं, एवं च सइति तत्शब्दवाच्यस्तत्कालतद्देशविशिष्टोदेवदत्तपिण्डः सः अयमितीदं शब्दवाच्यार्थ एतत्कालैतद्देशसम्बन्धविशिष्टात् तस्मात् देवदत्तपिण्डात् न भिद्यते इति यदा प्रतीयते तदा अयं शब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वं, तच्छब्दार्थस्य व्यावर्त्यत्वात् विशेष्यत्वं, तथा चायमेव सः सएवायमित्यन्योन्यभेदव्यावर्त्तकतया सोऽयं शब्दार्थयोः परस्परविशेषणविशेष्यभावइत्यर्थः ।

उक्तं विशेषणविशेष्यभावं दार्ष्टान्तिके योजयति। तथात्वमपीत्यादि। इहापि तत्त्वमसीति वाक्येऽपि त्वंपदवाच्यं यदपरोक्षत्वकिञ्चिज्ज्ञत्वादिविशिष्टचैतन्यं तत् तत्पदवाच्यात् सर्वज्ञत्वादिविशिष्टचैतन्यात् न भिद्यते इति यदा प्रतीयते तदा तच्छब्दार्थस्य त्वंपदार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वं, त्वंपदार्थस्य व्यावर्त्यत्वात् विशेष्यत्वम्। तथा च तत्पदवाच्यं यत् सर्वज्ञत्वादिविशिष्टचैतन्यं तत् त्वंपदवाच्यात् किञ्चिज्ज्ञत्वादिविशिष्टचैतन्यात् न भिद्यते इति यदा प्रतीयते तदा त्वंपदार्थस्य तत्पदार्थनिष्ठभेदव्यावर्त्तकत्वेन विशेषणत्वम्, तत्पदार्थस्य व्यावर्त्यत्वेन विशेष्यत्वम्। तथा त्वं तदसि तत्त्वमसीति तत्त्वंपदार्थयोः परस्परभेदव्यावर्त्तकत्वेन परस्परविशेषणविशेष्यभावइत्यर्थः।

क्रमप्राप्तं लक्ष्यलक्षणभावसम्बन्धस्वरूपं निरूपयितुमाह लक्ष्यलक्षणेत्यादि। असाधारणधर्मप्रतिपादकं वाक्यं लक्षणं, तत्प्रतिपाद्यमविशिष्टं वस्तु लक्ष्यम्। तथा च सोऽयं देवदत्तइत्यत्रापि वाक्ये सोऽयंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालतद्देशैतद्देशविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तत्वविशिष्टदेवदत्तपिण्डेन सह देवदत्तत्वविशिष्टदेवदत्तवाचकयच्छब्दस्य लक्ष्यलक्षणभावसम्बन्ध इत्यर्थः।

उक्तमर्थं दार्ष्टान्तिके योजयति। तथात्वमपीत्यादि। इहापि तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह तत्त्वंपदयोर्लक्ष्यलक्षणभावः सम्बन्धइत्यर्थः। अतएव तत्त्वंपदयोस्तदर्थयोश्च त्यक्ताविरुद्धांशयोर्लक्षणत्वं अखण्डचैतन्यस्य लक्ष्यत्वमिति भावः।

ननु तत्त्वमस्यादिवाक्यानां लक्ष्यलक्षणभावसम्बन्धपुरस्कारेण चैतन्यबोधकत्वमुक्तं अन्यत्र तु शास्त्रे तेषां वाक्यानां भागलक्षणयैव प्रतिपाद्यते। तत्त्वमस्यादिवाक्येषु लक्षणा—भागलक्षणेत्यादिविरोधमाशङ्क्य संज्ञाभेदो न वस्तुभेदइत्याह। इयमित्यादि। तत्त्वमस्यादिवाक्यानां विरुद्धांशपरित्यागेन अविरुद्धचैतन्यमात्रबोधकत्वमेव भागलक्षणेत्युच्यते इत्यर्थः।

ननु त्वया नीलोत्पलमितिवाक्ये नीलत्वविशिष्टनीलगुणस्य उत्पलत्वविशिष्टोत्पलद्रव्यस्य च स्वव्यतिरिक्तशुक्लादिगुणान्तरपटादिद्रव्यान्तरव्यावर्त्तकत्वेन विशेषणविशेष्यभावनिरूपिततद्भिन्नसंसर्गस्य नीलगुणवैशिष्ट्यस्य वाक्यार्थत्वं, तथेहापि तत्त्वमस्यादिवाक्ये तत्पदार्थस्य परोक्षत्वादिविशिष्टेश्वरचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य च अन्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभूतसर्वज्ञत्वकिञ्चिज्ज्ञत्वोभयनिरूपितसंसर्गो वा सर्वज्ञत्वादिविशिष्टस्य किञ्चिज्ज्ञत्वादिविशिष्टेन सह ऐक्यं वा वाक्यार्थो भवत्वित्याशङ्क्य दृष्टान्तदार्ष्टान्तिकयोर्वैषम्याच्चैवमित्याह । अखिन्नित्यादि । अखिन्नु तत्त्वमसीति वाक्ये नीलोत्पलमित्यादिवाक्यवत् संसर्गोवा विशिष्टोवा वाक्यार्थोन संगच्छते इत्यर्थः ।

नीलोत्पलमिति वाक्यस्य संसर्गविशिष्टार्थप्रतिपादकत्वकल्पने विरोधाभावं दर्शयति । अत्रेत्यादि । नीलोत्पलपदार्थयोः गुणगुणिनोर्विशेषणविशेष्यभावसंसर्गस्य नीलगुणविशिष्टोत्पलयोरैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणान्तरविरोधाभावात् तत्र तथा संगच्छते इति भावः ।

तत्त्वमसीति वाक्ये तु तत्त्वम्पदार्थयोः किञ्चिज्ज्ञत्वादिविशिष्टजीवचैतन्यस्य सर्वज्ञत्वादिविशिष्टेश्वरचैतन्यस्य वा अल्पानल्पविशेषणविशेष्यभावसंसर्गस्य तदुभयविशिष्टचैतन्यैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणान्तरविरोधात् पूर्वस्माद्वैषम्यं दर्शयति । अतस्त्वित्यादि । तदुक्तं, संसर्गोवा विशिष्टो वा वाक्यार्थोनात्र सम्मतः । अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः इति ।

ननु तत्त्वमस्यादिवाक्यमखण्डार्थं बोधयति किं जहत्स्वार्थलक्षणया, किमजहत्स्वार्थलक्षणया, आहोस्वित् जहदजहत्स्वार्थलक्षणया इति त्रिधा विकल्प्य आद्ये दूषणमाह । अत्रेति । अत्र तत्त्वमसीतिवाक्ये जहत्स्वार्थलक्षणा न संगच्छते इत्यन्वयः ।

तदेव दर्शयितुं जहत्स्वार्थलक्षणायां उदाहरणं तावदाह । गङ्गायामित्यादि ।

भागान्तरविरोधे तु मुख्यार्थस्यापरित्यागे। मुख्यार्थेनाविनाभूते प्रवृत्तिर्लक्षणेष्यते इति वचनात् गङ्गायां घोषावस्थानासम्भवात् गङ्गायां घोषइति वाक्यस्य मुख्यार्थे विरोधे सति मुख्यमर्थं परित्यज्य लक्षणया इत्या तत्सम्बन्धिनि तीरे घोषावस्थानप्रतिपादनात् तत्र जहत्स्वार्थ-लक्षणाङ्गीकारो युज्यते इत्याह। तत्रेत्यादि। आधाराधेयभावलक्षणं सर्वथा परित्यज्येत्यर्थः।

तत्त्वमसीति वाक्ये प्राक् प्रतिज्ञातं जहत्स्वार्थलक्षणासम्भवमाविष्करोति। अत्र त्वित्यादि। तच्छब्दः पूर्वज्ञातैक्यं द्योतयति। तत्त्वमसीतिवाक्ये परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य विरोधाभावात् परोक्षत्वापरोक्षत्वप्रतिपादकत्वांशे विरोधात् चैतन्यैकत्वे विरोधाभावात् गङ्गाघोषादिवाक्यवत् सर्वात्मना मुख्यार्थपरित्यागासम्भवात् जहत्स्वार्थलक्षणा न सम्भवतीत्यर्थः।

तत्र हेतुमाह। भागान्तरमित्यादि। विरुद्धयोः परोक्षत्वापरोक्षत्वयोरेकत्वासम्भवेन तत्त्यागेऽपि चैतन्यस्य भागस्यैकत्वे विरोधाभावात् त्यागो न युज्यते इत्यर्थः।

ननु यथा गङ्गायां घोषः प्रतिवसतीति वाक्ये गङ्गापदं स्वार्थं परित्यज्य स्वसम्बन्धितीरपदार्थं लक्षयति तथा तत्त्वमसीतिवाक्ये तत्पदं स्वार्थं परोक्षत्वादिविशिष्टं परित्यज्य जीवचैतन्यं लक्षयतु एवं त्वम्पदमपि स्वार्थं किञ्चिज्ज्ञत्वादिविशिष्टं परित्यज्य ईश्वरचैतन्यं वा लक्षयतु तस्मात् जहत्स्वार्थलक्षणैव भवतीत्याशङ्क्य निराकरोति। नचेत्यादि।

निराकरणप्रकारमेवाह। तत्रेत्यादि। श्रुतवाक्यस्य मुख्यार्थविरोधे मुख्यार्थसम्बन्धिन्यश्रुतपदार्थे लक्षणेति सर्वजनसिद्धम्। तथा च गङ्गायां घोषः इत्यत्र श्रुतवाक्यार्थस्य गङ्गाघोषयोराधाराधेयभावसम्बन्धस्य विरोधे सति श्रूयमाणं गङ्गापदं स्वार्थपरित्यागेन तीरपदार्थं लक्षयतीत्युक्तं गङ्गापदार्थस्य तीरपदार्थं प्रतीतिसापेक्षत्वात्। इह तु श्रूयमाणतत्त्वंपदयोर्मुख्यतयैव तदर्थसर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविशिष्टप्रतीतौ सत्यामपि लक्षणया तत्पदेन त्वंपदार्थप्रतीत्यपेक्षाभावात् त्वंपदेन तत्पदार्थप्रतीत्यपे-

ज्ञाभावाच्च, मुख्यार्थे सम्भवति लक्षणाया अन्याय्यत्वात् जहत्स्वार्थलक्षणापि न सम्भवतीत्यर्थः ।

द्वितीयं दूषयति । अत्रेत्यादि । अत्र तत्त्वमसीति वाक्ये अजहत्स्वार्थलक्षणापि न सम्भवतीत्यन्वयः ।

कृतदृष्टान्तमाह । तत्र गोर्गोत्यादि । तत्र गौर्गौ धावतीत्यादिवाक्ये गोगुणस्य गमनासम्भवेन वाक्यस्य मुख्यार्थविरोधे सति भूयमाणं गोपदं स्वार्थपरित्यागेन स्वाश्रयमश्वादिकं लक्षयतीति युक्तम् । अत्र तु तत्त्वमस्यादिवाक्ये तत्त्वम्पदार्थस्य परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य मुख्यवाक्यार्थस्य विरुद्धत्वात् परोक्षत्वापरोक्षत्वपरित्यागेनतद्विशिष्टचैतन्यलक्षणार्थस्य लक्षितत्वेऽपि तद्विरोधपरिहाराभावादजहत्स्वार्थलक्षणा न सम्भवतीत्यर्थः ।

ननु तत्पदं स्वार्थविरुद्धपरोक्षत्वादिधर्मं परित्यज्याविरुद्धचैतन्यांशपरित्यागेन त्वंपदार्थं किञ्चिज्ज्ञत्वादिविशिष्टं जीवचैतन्यं लक्षयतु, त्वंपदं वा स्वार्थविरुद्धापरोक्षत्वादि धर्मं परित्यज्याविरुद्धचैतन्यांशपरित्यागेन तत्पदार्थं सर्वज्ञत्वादिविशिष्टमीश्वरचैतन्यं लक्षयतु, किं भागलक्षणाङ्गीकारेणेत्याशङ्क्य निराकरोति । नचेत्यादि । एकेन तत्पदेन त्वंपदेन वा स्वार्थांशपरित्यागेन पदार्थान्तरोभयलक्षणासम्भवादित्यर्थः ।

अजहत्स्वार्थलक्षणासम्भवे हेत्वन्तरमाह । पदान्तरेणेत्यादि । तत्पदेन त्वंपदेन वा तत्तदर्थप्रतीतौ सत्यां लक्षणया पुनरन्यतरस्यान्यतरप्रतीत्यपेक्षाभावादित्यर्थः ।

अतः परिशेषात् तृतीयपक्षएवाङ्गीकर्त्तव्य इत्युपसंहरति । तस्मादित्यादि । यस्मात्तत्त्वंपदस्यादिवाक्ये जहत्स्वार्थलक्षणाजहत्स्वार्थलक्षणयोरसम्भवः तस्मात् जहदजहत्स्वार्थलक्षणया विरुद्धांशं परित्यज्याविरुद्धाखण्डचैतन्यमात्रं लक्षयतीति योजना ।

तत्र दृष्टान्तमाह । यथेति । यथा सोऽयं देवदत्त इति वाक्ये प्रागुक्तजहत्स्वार्थलक्षणाजहत्स्वार्थलक्षणयोरसम्भवेन तदर्थस्य तत्काल-

तद्देशविशिष्टस्यैतत्कालैतद्देशविशिष्टस्य च देवदत्तलक्षणवाक्यार्थस्य एकस्मिन्नंशे तत्कालैतत्कालवैशिष्ट्यभागे विरोधदर्शनात् तत्परित्यागेनाविरुद्धदेवदत्तपिण्डमात्रं लक्षयतीत्यर्थः। भागान्तरविरोध इत्युक्तन्यायेनेत्यर्थः।

उक्तमर्थं दार्ष्टान्तिके योजयति। तथा तत्त्वमसीत्यादि। तथा तत्त्वमस्यादिवाक्यस्यापि परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणवाक्यार्थप्रतिपादकत्वासम्भवात् जहदजहल्लक्षणया विरुद्धपरोक्षत्वादिविशिष्टांशपरित्यागेनाविरुद्धाखण्डचैतन्यमात्रप्रतिपादकत्वं तस्येत्यर्थः।

अखण्डचैतन्यप्रतिपादकस्य तत्त्वमसीतिवाक्यस्यार्थं सम्प्रदायमभिधाय इदानीं यजुर्वेदानुभववाक्यार्थो वर्ण्यते इत्याह। अथेत्यादि। गुरुमुखात्श्रवणात्यस्तत्त्वमस्यादिवाक्यश्रवणात् देहाद्यहङ्कारान्तजड़पदार्थसकलदृश्यविलक्षणप्रत्यगात्मनः शुद्धेन परमात्मना सहैकत्वबोधानन्तरं कश्चिदधिकारी लब्धावसरं सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दैकरसं अनुभवेन जिज्ञासुराचार्योपदिष्टमहं ब्रह्मास्मीति वाक्यार्थमनुस्मरन् स्वात्मानन्दमनुभवतीत्यर्थः।

तत्प्रकारमाह। एवमित्यादिना। एवं सङ्क्षेपेण प्रकारेणाधिकारिणश्चित्तवृत्तिरुदेतीति सम्बन्धः।

कदा उदेतीत्यपेक्षायामाह। आचार्येणेति। आचार्येणाविषये उपाधिरहितेऽसङ्गे निष्कले चैतन्ये शशशृङ्गायमानाविद्यया अहङ्कारादिशरीरान्तमिथ्यापदार्थमध्यारोप्य तदपवादपुरःसरं तत्त्वं पदार्थौ बोधयित्वा तत्त्वमसीतिवाक्येन जहदजहल्लक्षणया विरुद्धांशपरित्यागेनाखण्डार्थचैतन्ये ज्ञाते सतीत्यर्थः।

किं विषयिनी चित्तवृत्तिरुदेतीत्यसम्भवशङ्कां निवारयति। अहमिति अहं प्रत्यगात्मा परं ब्रह्मास्मीत्यन्वयः।

ब्रह्मानित्यत्वशङ्कां निराकरोति। नित्येति। शुद्धपदेन स्वप्रकाशपरत्वेन जाड्यादि व्यवच्छिद्यते। मुक्तपदेन सर्वोपाधिरहितत्वम्। शुद्धपदेनाविद्यादिदोषरहितत्वम्। सत्यमित्यविनाशिस्वभावत्वम्। परमानन्दपदेन वैषयिकमनुष्यानन्दादिचतुर्मुखब्रह्मानन्दपर्यन्तानां कर्मजन्यत्वेन

सातिशयत्वेन क्षयिष्णुत्वेन च तुच्छत्वात् तेभ्योविलक्षणं निरतिशयमनन्त-स्वरूपत्वं प्रतिपाद्यते। अनन्तपदेन घटादिवत् परिच्छेदराहित्येन देशतः कालतः वस्तुतश्चापरिच्छिन्नत्वं बोध्यते। अद्वयमिति नानात्व-निषेधेन एकत्वं बोध्यते इत्यर्थः।

ननु यथा दीपप्रभा आदित्यमण्डलं न व्याप्नोति न च प्रयोजन-वास्ते तथा नित्यशुद्धस्वप्रकाशमात्मानं जड़चित्तवृत्तिः कथं विषयीकृत्यो-देति किं प्रयोजनं वेत्याशङ्क्याह। सात्मित्यादि। सा चित्तवृत्तिः न शुद्धब्रह्मविषयिनी किन्तु अज्ञानविशिष्टप्रत्यगभिन्नपरब्रह्मविषयिनी, सा च चैतन्यप्रतिबिम्बसम्बलिता सती चैतन्यमज्ञानं निवर्त्तयति। तस्माच्चैतन्या-परकाज्ञाननिवृत्तिरेव प्रयोजनमित्यर्थः।

नन्वधिकारिणस्तत्त्वमस्यादिवाक्यश्रवणोत्पन्नाखण्डचैतन्यवृत्त्या तदा-श्रिताज्ञाने निवारितेऽपि तत्कार्य्यस्य सकलचराचरप्रपञ्चस्य प्रत्यक्षतया भासमानत्वात् कथमद्वैतसिद्धिरित्याशङ्क्य कारणाज्ञाननाशे तत्कार्य्य सकल-प्रपञ्चनाशादद्वैतसिद्धिरित्येतत् सदृष्टान्तमाह। तदेत्यादि।

नन्वज्ञाननाशेन तत्कार्य्यप्रपञ्चनाशोऽस्तु तथाप्यखण्डाकारनिवृत्तेः अद्वैतहानिरित्याशङ्क्याह। तदज्ञभूतेति। अखण्डाकारचित्तवृत्तेरपि अज्ञानतत्कार्य्यानभिज्ञत्वात् तद्विवृत्त्या तद्विवृत्तेर्नाद्वैतहानिरित्यर्थः।

ननु तथाप्यखण्डाकारवृत्तिप्रतिबिम्बितचैतन्याभाससत्त्वात् कथमद्वैत-सिद्धिरित्याशङ्क्याह। तत्रेत्यादि। वृत्तिनिवृत्तौ तत्प्रतिबिम्बितचैतन्यस्य बिम्बावभासनासमर्थत्वात् वृत्त्युपाधिबाधेन तत्प्रतिबिम्बचैतन्यमपि चैतन्यमात्रतया अवशिष्यते दर्पणोपाधिविगमे तत्प्रतिबिम्बितमुखाभासस्य बिम्बभूतमुखमात्रतावशेषवदित्यर्थः। अयं भावः, बोधितत्त्वं पदार्थ-स्याधिकारिणः तदा विजृम्भिते गुरुशास्त्रादिभ्यस्तत्त्वमसीत्युपदेशे अहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानन्दाद्वयाखण्डब्रह्मास्मीति चित्तवृत्ति-रुदयमासादयति। तदानीमेव तस्याभिव्यक्ताखण्डचैतन्यबलेन तत्त्व-परिपीड़िताज्ञाननाशो भवति। तदानीं तत्कार्य्यस्य सर्वस्य नाशात् नहू-त्तिस्त्रिरपि स्वयमेव कतकरजोवत् दारुमथनजनिताग्निवत् उदरस्थदुष्ट-

जलधान्त्यर्थं पीततप्तजलवच्च नष्टा भवति। तदानीं तद्गताभासोऽपि स्वोपाधिभूतवृत्तिनाशात् स्वप्रकाशात्मावभासनासमर्थं तया दर्पणविगमे तदुपाधिकस्य स्वाधिष्ठानसुखमात्मत्वदधिष्ठानमात्रोभवतीति वेदान्तसिद्धान्तरहस्यमिति। अत्र तस्यानुभवः, लोकाश्च भान्ति परमे मयि मोहजन्याः स्वप्नेन्द्रजालमरुनीरसमाविचित्राः। व्युत्थानकालदृढ न स्फुरलं विगुद्धप्रत्यक्सुखाब्धिपरमामृतचित्तदृष्टौ। मत्तःपरं न खलु किञ्चन्यदपि भाति मय्येव पूर्वभरं नरसङ्गतुल्यम्। मोघोत्थशोकसुखवाक्यकृतुल्यबोधभानुप्रभाविलसिते क्व गतं न जाने। निरतिशयसुखाब्धिस्वप्रकाशे परेऽस्मिन् कथमिदमविवेकादुत्थितं स्वप्नफणीव। क्व नु गतमधुना तत् देशिको वा श्रुतिर्वा परमविमलबोधेऽभूत्थितेऽहं न जाने इति।

तदेतत्सर्वं मनसि निधायोपसंहरति। प्रत्यगभिन्नेति।

ननु मनसैवानुद्रष्टव्यं, मनसैवेदमाप्तव्यं, दृश्यते त्वयाग्र्या बुद्ध्या, बुद्ध्यालोकनसाध्येऽस्मिन् वस्तुन्यस्मिते यदि, बुद्धियोगमुपाश्रित्य मच्चित्तः सततंभव इत्यादिस्मृतिशतानां यतोवाचोनिवर्तन्तेऽप्राप्य मनसा सह, यन्मनसा न मनुते, अन्यदेव तद्विदितादथोऽविदितादधि, अविज्ञातं विजानतां विज्ञातमविजानतां, अनधिगतोऽप्रमेयश्च, यद्विज्ञातं त्वया विमृश्यैव विज्ञानमात्मना ताभ्यामन्यत्परंविद्धि यदेतद्यं तच्छ्रुतिभित्यादिस्मृतिशतानाञ्च परस्परविरोधमाशङ्क्य परिहरति। एवञ्चेत्यादि। एवमुक्तप्रकारेण अज्ञातचैतन्यस्य वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वे प्रतिषिद्धे सतीत्यर्थः।

तदेवाह। वृत्तीत्यादि। अन्तःकरणवृत्तिरावरणनिवृत्त्यर्थं अज्ञानावच्छिन्नचैतन्यं व्याप्नोतीत्येतद्वृत्तिव्याप्यत्वमङ्गीक्रियते। आवरणभङ्गानन्तरं स्वयं प्रकाशमानं चैतन्यं फलचैतन्यमित्युच्यते, अस्मिन् फलचैतन्ये निष्कलङ्के चित्तवृत्तिर्नैव व्याप्नोति आवरणभङ्गस्य प्रागेव जातत्वेन प्रयोजनाभावादित्यर्थः।

अस्मिन्नर्थे ग्रन्थान्तरं सम्वादयति। उक्तञ्चेत्यादि।

वृत्तिप्रतिबिम्बाभासचैतन्यस्यापि फलचैतन्यप्रकाशकत्वं नेत्यत्रापि

सम्मतिमाह । स्वयमित्यादि ।

इदानीं जड़पदार्थविषयकचित्तवृत्तेर्ब्रह्माकारचित्तवृत्त्यपेक्षया वैलक्षण्यं दर्शयितुमाह । जड़पदार्थेति । अहंब्रह्मास्मीत्यज्ञानावच्छिन्नब्रह्माकारावृत्तिस्तदावरकमज्ञानमात्रं निवर्त्तयति, ब्रह्मतु स्वप्रकाशात्मत्वात् स्वयमेव प्रकाशते, न तु वृत्तिप्रतिबिम्बितचिदाभासेन चैतन्यं प्रकाश्यते तत्र तस्यासामर्थ्यात् । अयं घटइति घटाकाराकारितचित्तवृत्तिस्तु घटावच्छिन्नचैतन्यावरकाज्ञानं निवर्त्य स्वप्रतिबिम्बितचिदाभासेन जड़ं घटमपि प्रकाशयति, अनस्तोविशेषोऽस्तीत्यर्थः ।

एतदेव प्रपञ्चयितुं प्रतिजानीते । तथाहीति ।

जड़पदार्थविषयिनीं चित्तवृत्तिमभिनीत दर्शयति । अयमिति । वृत्तिसम्बन्धात् प्राक् घटस्याज्ञातत्वादज्ञातं घटं विषयीकृत्य प्रवृत्ता चित्तवृत्तिर्घटगताज्ञानं दूरीकुर्वाणा घटमपि भासयति इत्यर्थः ।

अस्मिन्नर्थे वृद्धसम्मतिमाह । तदुक्तमित्यादि । बुद्धिश्च तत्र बुद्धौ प्रतिबिम्बितचिदाभासश्च बुद्धितत्स्थचिदाभासौ घटं व्याप्नुतः । तत्र तयोर्मध्ये धिया वृत्त्या घटाज्ञानं नश्येत् चिदाभासेन तु घटः स्फुरेदित्यर्थः ।

अत्रानुरूपं दृष्टान्तमाह । यथेत्यादि । यथान्धकारावस्थितं घटादिकं विषयीकृत्य प्रवर्त्तमानं दीपप्रभामण्डलं घटावरकान्धकारनिवृत्तिद्वारा स्वप्रभया घटादिकं प्रकाशयति तद्वदित्यर्थः ।

इयता ग्रन्थजालेन प्रतिपादितस्य प्रत्यगभिन्नपरमानन्दाखण्डचैतन्यस्य साक्षात्कारलक्षणां अखण्डाकारान्तःकरणवृत्तिं प्रतिपिपादयिषुः तत्साधनभूतश्रवणादेरवश्यानुष्ठेयत्वं तेषां लक्षणानि च क्रमेण दर्शयति । एवमित्यादिना अद्वैतं वस्तु भासतइत्यन्तेन ।

एवम्भूतश्रौतयुक्त्यनुभवैर्निरस्तसमस्तोपाधिप्रत्यगभिन्नपरमानन्दचिद्रूपस्य साक्षात्कारपर्य्यन्तं श्रवणादीन्यनुष्ठेयानीति प्रतिजानीते । तेऽपीति । श्रवणादयोऽपीत्यर्थः ।

तत्र श्रवणस्य लक्षणमाह । षष्ठ्यर्थेति । शिङ्गं अर्थं गमयतीति

लिङ्गशब्दस्य व्युत्पत्तेः ब्रह्मात्मैकत्वनिश्चायकैरुपक्रमोपसंहारादिषड्भिर्लिङ्गैः सर्वेषां वेदान्तवाक्यानामद्वितीये ब्रह्मणि तात्पर्यनिश्चयः श्रवणमित्यर्थः।

तानि च लिङ्गानि क्रमेणोपदिशति। उपक्रमेति। तथा चोक्तं, उपक्रमोपसंहाराभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये इति।

उपक्रमोपसंहारौ तावदुदाहृत्य दर्शयति। प्रकरणप्रतिपाद्यस्येति।

तदुदाहृत्य दर्शयति। यथेति। एकमेवाद्वितीयमित्युपक्रम्य ऐतदात्म्यमिदं सर्वमिति प्रतिपादनं उपक्रमोपसंहारावित्यर्थः।

अभ्यासस्य लक्षणमाह। पौनः पुन्येति।

अत्रापि श्रुतिमुदाहरति। यथेत्यादि।

अपूर्वत्वस्य लक्षणमाह। प्रकरणेति। तत्त्वौपनिषदं पुरुषं पृच्छामीत्यादिश्रुतिभिरुपनिषन्मात्रवेद्यत्वप्रतिपादनात् ब्रह्मणोऽपूर्वत्वमित्यर्थः। अथवा ब्रह्मस्वप्रकाशत्वेन स्वव्यवहारे स्वातिरिक्तप्रमाणानपेक्षत्वात् ब्रह्मणोऽपूर्वत्वमित्यर्थः।

क्रमप्राप्तस्य फलस्य लक्षणमाह। फलमिति।

अत्रानुरूपमुदाहरणमाह। आचार्यवानिति। श्रवणादिसाधनानां ब्रह्मात्मैकत्वविज्ञानं प्रयोजनं, ब्रह्मज्ञानस्य तत्प्राप्तिः फलं, ब्रह्म वेद ब्रह्मैव भवति, तरति शोकमात्मवित्त्वादित्यादिश्रुतेरित्यर्थः।

पञ्चमलिङ्गस्यार्थवादस्य लक्षणमाह। प्रशंसनमिति। प्रकरणप्रतिपाद्याद्वितीयब्रह्मस्वरूपस्तावकवाक्यमर्थवादइत्यर्थः।

तत्रापि श्रुतिमाह। उत तमादेशमित्यादि। येनाश्रुतं श्रुतं भवतीति। येन सकलप्रपञ्चाधिष्ठानब्रह्मस्वरूपश्रवणेनाश्रुतं प्रपञ्चजातमपि श्रुतं भवति, येन ब्रह्मज्ञानेनाज्ञातं सर्वं जगत् ज्ञातं भवति, येन ब्रह्मसाक्षात्कारेण साक्षात्कृतं भवति ब्रह्मणः सर्वतः संप्लुतोदकस्थानीयत्वादित्यर्थः।

अवशिष्टाया उपपत्तेर्लक्षणमाह। युक्तिरिति।

तानुदाहरति । तत्र यथेति । मृद्विकारेषु घटादिषु विकारनामधेययोर्वाचारम्भणमात्रत्वेन यथा मृदेवावशिष्यते नान्यत् तथा चिद्विवर्त्तस्य प्रपञ्चस्य गिरिनदसमुद्रात्मकविकारनामधेययोर्वाचारम्भणमात्रत्वात् चिन्मात्रमेवावशिष्यते रज्जुविवर्त्तस्य रज्जुमात्रत्वावशेषवदित्यर्थः ।

श्रवणनिरूपणानन्तरं तदुत्तराङ्गस्य लक्षणमाह । मननमिति । यद्धि लिङ्गयुक्तात्पर्यपूर्वकं श्रुतस्याद्वितीयब्रह्मणो वेदान्तविरोधिनीभिर्युक्तिभिर्बुद्धेरर्थेन अनुचिन्तनमित्यर्थः ।

निदिध्यासनलक्षणमाह । विजातीयेति । विजातीयदेहादिषु उद्भवन्नजड़पदार्थविषयकप्रत्ययनिराकरणेन सजातीयाद्वितीयवस्तुविषयकप्रत्ययप्रवाहीकरणं निदिध्यासनमित्यर्थः ।

व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावे सति चित्तस्यैकाग्र्यतापरिणामः समाधिः ।

स च द्विविधइत्याह । सविकल्पकइत्यादि ।

आद्यस्य लक्षणमाह । तत्रेति । तत्र तयोः सविकल्पकनिर्विकल्पकयोर्मध्ये सविकल्पकोऽपि द्विविधः । अहं ब्रह्मास्मीति शब्दानुविद्धतया अद्वितीये वस्तुनि चित्तवृत्तेरवस्थानमित्येकः । द्वितीयस्तु ज्ञातृज्ञानज्ञेयत्रिपुटीलयानपेक्षया अहं ब्रह्मास्मीति शब्दाननुविद्धतया अद्वितीये वस्तुनि अविच्छेदेन चित्तवृत्तेरवस्थानमिति ।

ननु भक्तितेऽपि लघुने न ग्लानोव्याधिरिति न्यायेन उक्तसविकल्पकसमाध्योः सकलभेदनिराकरणाय प्रयत्नेनात् तयोरपि ज्ञातृत्वादिभेदविषयकत्वाद्वाद्वैतवस्तुभावभानं तत्रेत्याशङ्क्योत्तरमाह । तदेति । तदा सविकल्पकसमाध्यनुभवकाले ज्ञातृत्वादिभेदप्रतीतावपि अद्वैतं वस्तु भासतएव । सुवर्णमयकुण्डलादिभाने सुवर्णभानवत् मृण्मयगजादिभाने मृद्भानवच्च, गजादिभानस्य वाचारम्भणमात्रत्ववत् ज्ञातृत्वादिभानस्यापि वाचारम्भणमात्रत्वात् अद्वैतं वस्तु भासते इत्यर्थः । यद्वा सर्वं खल्विदं ब्रह्म, ऐतदात्म्यमिदं सर्वमित्यादिश्रुतिबलात् सर्वमद्वयमिति गिरिनदीसमुद्रात्मकं सर्वं जगत् स्वाभिन्नसच्चिदानन्दब्रह्मत्वेनानुभूय तत्र दग्धपटन्यायेन प्रपञ्चभानेऽ

व्यद्वैतं सच्चिदानन्दलक्षणं वस्तु भासते एवेत्यर्थः। तदुक्तं भगवता, वासुदेवः सर्वमिति समहात्मा सुदुर्लभइति।

मूनकारोऽपि अस्मिन्नर्थे अन्यान्तरसम्मतिं दर्शयति। तदुक्तमिति। ओमिति यत् परं ब्रह्म तदेवाहमित्यन्वयः।

किं तदित्याह। दृशिस्वरूपमिति। दृशिर्दृष्टिस्तस्यारूपं द्रष्टृत्वं तदृयस्य परमात्मस्वरूपस्य तत् दृशिस्वरूपं साक्षिस्वरूपमित्यर्थः। तदुक्तं भगवता, उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः। परमात्मेति चाप्युक्तोदेहेऽस्मिन् पुरुषः परइति। पुनः किं स्वरूपं तत् गगनोपमं गगनं उपमा दृष्टान्तो यस्य तद् गगनोपमं गगनवच्छिलेपस्वरूपमित्यर्थः। तथाच भगवद्वचनं, यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते। सर्वत्रावस्थितोदेहे तथात्मा नोपलिप्यते इति। यद्वा गगनोपमं गगनवदमूर्त्तस्वरूपमित्यर्थः, आकाशशरीरं ब्रह्मेति श्रुतेः। पुनः किम्भूतं सकृत्विभातं सकृदेकदैव विभातं सर्वदैकस्वरूपेण भासमानं न चन्द्रादिप्रकाशवत् वृद्धिक्षयशीलमित्यर्थः। पुनः किम्भूतमजं जन्मरहितं। एकं निरस्तसमस्तोपाधिभेदम्। अक्षरं विनाशधर्म्मराहित्येन कूटस्थस्वरूपमित्यर्थः। तथाच भगवानाह, क्षरः सर्वाणि भूतानि कूटस्थोऽक्षरउच्यते इति। अलेपकं असङ्गत्वादविद्यादिदोषरहितमित्यर्थः। असङ्गोह्ययं पुरुषइतिश्रुतेः। सर्वगतं सर्वत्र ब्रह्माण्डादिस्थावरान्तेषु भूतेषु गतं व्याप्तं। अद्वयं स्वजातीयविजातीयस्वगतभेदराहित्येन द्वितीयरहितम्। सततं विमुक्तमिति सर्वदा कार्य्यकारणात्मकसर्वोपाधिविनिर्म्मुक्तत्वेन सन्तैकरूपमित्यर्थः। तथाच भागवते, वङ्गोमुक्तइति व्याख्या गुणतो मे न वस्तुतइति। तथाच एतादृशं निरतिशयमानन्दं यत्परं ब्रह्म तदेवाहमिति भावयतोनिषेध प्रतियोगित्वेन तत्तदुपाधेर्भानात् तत्प्रयुक्तभेदभानेऽप्यद्वैतं भासतएवेत्यर्थः।

निर्विकल्पकसमाधिस्वरूपमाह। निर्विकल्पकमिति। अयञ्च द्विविधः, चिरकालाभ्यस्तयदुत्तरसविकल्पकसमाध्यनुभवजनितसंस्कारसहकृतायाश्चित्तवृत्तेर्ह्रदादिलिपुटीलयपूर्वकमद्वैते वस्त्वेकलीभावावस्थानात्मकः

प्रथमः। एतच्चिर्विकल्पकसमाध्यभ्यासपाटवेन लुप्तसंस्कारतया ज्ञाता-दित्रिपुटीलयपूर्वकमखण्डाकाराकारितायाश्चित्तवृत्तेर्धर्मिणापि स्वस्फूर्त्तिं केवलचिदानन्दात्मनायस्थानात्मकोद्वितीयः।

तत्र द्वितीयं पक्षमभिप्रेत्याह। ज्ञातृज्ञानादीति।

नन्वेवं सप्तधिसुषुप्तयोर्भिन्नत्वाभावेन वृत्तप्रभावादभेदमाशङ्क्य परिहरति। ततश्चेति।

तत्र युक्तिमाह। उभयत्रेति। समाधिसुषुप्तयोरित्यर्थः। तत्सद्भावेति समाधावज्ञायमानवृत्तिसद्भावात् सुषुप्तौ वृत्तप्रभावाच्च तयोर्भेदोपपत्तेरित्यर्थः।

उक्तसमाधेः साधनापेक्षायामाह। अस्याङ्गानीति।

तानि च साधनानि क्रमेणोद्दिशति। यमेति। यमाद्यष्टाङ्गानि समाधेरन्तरङ्गसाधनानीत्यर्थः।

प्रथमं यमस्य लक्षणमाह। तत्रेत्यादि। तेषु यमाद्यष्टाङ्गेषु मध्ये अहिंसादयः पञ्च यमा अनुष्ठेयादित्यर्थः।

तदनन्तरं नियमानाह। शौचेत्यादि। शौचादयः पञ्च नियमाः इत्यर्थः।

आसनं लक्षयति। करेत्यादि।

प्राणायामलक्षणमाह। रेचकेत्यादि। दृढ़या पूरयेद्वायुं सुषुम्नेड़ापिङ्गलयानिलं। यावत् श्वासं समासीनः कुम्भयेत्तं सुषुम्नया। यदा योगी पद्मादासने उपविश्य योगमभ्यस्यति तदा गुल्फाभ्यां गुह्यभूतं निष्पीड्य खेचरीमुद्रासाहाय्येन प्राणधारणया सुषुम्नामार्गेण मूलाधारात् कुण्डलिनीमुत्थाप्य स्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञानिर्वाणाख्यषट्चक्रभेदक्रमेण सहस्रदलकमलकर्णिकायां विद्यमान परमात्मना सह संयोज्य तत्रैव चित्तं निर्व्यातदीपवदचलं कृत्वा स्वात्मानन्दरसं पिबतीत्येतं प्राणायामफलम्। स च द्विविधः, सगर्भः अगर्भश्चेति। सुषुम्नेतं दक्षिणया वायुं कालाद्दीनकनन्दधीः। पूरयेद्वामया तद्वत् कुम्भयेच्च सुषुम्नया। यावत्श्वासं ललाटोभवेन्नासाग्रलोकनेन्द्रियः कृति। प्रणवोच्चारणराहित्येन उक्तरेचकपूरककुम्भकक्रमेण प्राण-

निरोधोऽगर्भः प्राणायामः। रेचयेत् षोड़शेनैव सदुद्वैगुण्येन पूरयेत्। कुम्भयेच्च चतुःषष्ट्या प्रणवार्थमनुस्मरन्निति वचनात् षोड़शसंख्याकं प्रणवं मनसा जपन् दक्षिणया वायुं विरिच्य द्वात्रिंशत्संख्याकं प्रणवं मनसा समुच्चरन् यामया वायुमापूर्य चतुःषष्टिसंख्याकं प्रणवं मनसा जपन् तदर्धञ्चाकारोकारमकारार्द्धमात्मकसार्द्धत्रिवलयाकारकुण्डलिनीरूपं चिदानन्दकन्दञ्च मूलादिब्रह्मरन्ध्रान्तमनुसन्दधन् क्षुण्ण्या चित्तमपि तदेकप्रवणं कुर्वन् यावत्श्वासं कुम्भयेत् तदुक्तमाचार्यैः, षोड़शद्विगुणचतुःषष्टिमात्राणि च तानि च क्रमशः। रेचकपूरककुम्भकभेदैस्त्रिविधः प्रभञ्जनायामः इति प्राणायामप्रकारः।

क्रमप्राप्तं प्रत्याहारं निरूपयति। इन्द्रियाणामित्यादि। श्रोत्रादीनामिन्द्रियाणां स्वस्वविषयेभ्यः शब्दादिभ्यः सकाशात् यानि यानीषदपि प्रयुक्तशरसङ्कातवत् प्रत्यावर्त्तनं प्रत्याहारः। नन्विन्द्रियाणां स्वस्वविषयेभ्योनिवर्त्तनं प्रत्याहारइत्युक्तं तन्न सम्भवति, शब्दादिविषयाणां सुखसाधनत्वेन वैषयिकसुखव्यतिरिक्तनिरतिशयानन्दसद्भावे प्रमाणाभावात् हैरण्यगर्भाद्यमृतभोगस्येश्वरेणापि त्यक्तुमशक्यत्वादिति चेन्न, मूढैः कर्म्मजड़ैर्विषयलम्पटैस्त्यक्तुमशक्यत्वेऽपि शुद्धान्तःकरणेन संसाराविद्यकत्वदर्शिना विषयदोषदर्शनेन तुच्छीकृतशब्दादिविषयप्रपञ्चेन पुरुषोत्तमेन त्यक्तुं शक्यत्वात्, अन्यथा संसारएव लोलुप्येत। तस्मात् सत्प्रसङ्गेन तपसामतिरिक्तमाहुः। एतमेव लोकमिच्छन्तः प्रव्राजिनः प्रव्रजन्ति तत्सर्व्वं भूःस्वाहेत्यग्नौ परित्यज्य आत्मानमन्विच्छेत् न कर्म्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः, ब्रह्मचर्य्यादेव प्रव्रजेत् तदहरेव प्रव्रजेत् वनाद्वा गृहाद्वा। सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज। संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्रव्रजन्त्यतोद्दाहृताः परं वैराग्यमाश्रिताः। प्रत्यग्विविदिषासिद्ध्यै वेदानुवचनादयः। ब्रह्मावाप्त्यै श्रुतत्यागमीषुसन्नीति श्रुतेर्वेलादित्यादिस्मृतिभिः। तथा ह्यानन्दोब्रह्मेति व्यजानात्, एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति, एषोऽस्य परमआनन्दः, आत्मैवानन्दः, यदेषआकाशआन-

न्दो न स्यात्, आनन्दाद्येव खल्विमानि भूतानीत्यादिश्रुतिभिश्च नित्यात्मसुखस्य प्रतिपादितत्वात् । शब्दादिवैषयिकसुखव्यतिरिक्तनिरतिशयानन्दसद्भावे प्रमाणाभावादित्यं तदपि निरस्तं बोद्धव्यम् ।

सम्यति धारणां लक्षयति । अद्वितीयेत्यादि । सर्वेषां बुद्धिसाक्षितया विद्यमानेऽद्वितीयवस्तुनि चित्तस्थैर्यणं धारणेत्यर्थः ।

धारणापाटवाभावेन चित्तस्थैर्याभावात् अद्वितीये वस्तुनि विच्छिद्य विच्छिद्य चित्तवृत्तिप्रवाहीकरणं ध्यानमित्याह । तत्रेत्यादि ।

समाधिरुक्तएव सविकल्पकः कर्तव्यइत्याह । समाधिरिति ।

उक्तयमाद्यष्टाङ्गसहितनिर्विकल्पकसमाधेर्निर्विघ्नानुष्ठानसिद्ध्यर्थं विघ्नज्ञानव्यतिरेकेण निराकरणस्य कर्तुमशक्यत्वात् अस्य चतुरोविघ्नान् सन्दर्शयति । एवमित्यादि ।

तत्राद्यं विघ्नं लक्षयति । लयस्तावदिति । लयोद्विविधः, चिरकालसुक्ताष्टाङ्गसहितनिर्विकल्पकसमाध्यभ्यासपाटवेनातितन्मयोद्दीपतलक्षिप्तजलविन्दुवत् तैलरक्षितदीपकलिकायश्च प्रत्यगभिन्ने परमानन्दे चित्तवृत्तेर्लयः प्रथमः । द्वितीयस्तु मूर्च्छावस्थावत् आलस्येन चित्तवृत्तेर्बाह्यशब्दादिविषय ग्रहणानादरे सति प्रत्यगात्मस्वरूपानवभासनात् वृत्तेस्तूष्णीभावलक्षणनिद्रारूपः ।

तत्राद्यमङ्गीकृत्य द्वितीयस्य विघ्नत्वेन तत्त्यागाय तत्स्वरूपमाह । अखण्डयस्त्वित्यादि ।

द्वितीयं विघ्नमाह । अखण्डेत्यादि । अखण्डवस्तुग्रहणायान्तर्मुखतया प्रवृत्तायाश्चित्तवृत्तेश्चिदनवलम्बनेन तत्सपत्न्यित्वं पुनर्बाह्यविषयग्रहणाय प्रवृत्तिर्विक्षेप इत्यर्थः ।

तृतीयं विघ्नमाह । लयेत्यादि । रागादयश्चिविधाः बाह्याः आभ्यन्तराः वासनामात्ररूपाश्चेति । बाह्याः पुत्रादिविषयाः । आभ्यन्तराः मनोराज्यादयः । संस्काररूपावासनामयाः । तत्रानेकजन्माभ्यस्तबाह्याभ्यन्तररागाद्यनुभवजनितसंस्कारैः कलुषीकृतं चित्तं कथञ्चित् श्रवणादिसाधनेनान्तर्मुखमपि चैतन्य ग्रहणसामर्थ्याभावात् मध्यएव

स्तब्धीभवति यथा राजदर्शनाय स्वप्रहाच्चिर्गत्य राजमन्दिरं प्रविष्टस्य कस्यचित् पुरुषस्य द्वारपालनिरोधेन स्तब्धीभावः तथा परित्यक्तबाह्यविषयस्य अखण्डवस्तुग्रहणाय प्रवृत्तस्योद्भूतरागादिसंस्कारैस्तब्धीभावादखण्डवस्त्वग्रहणं कषायदुःखमित्यर्थः।

चतुर्थं विघ्नमाह। अखण्डेति। उक्तसविकल्पकसमाध्योर्मध्ये हीनोयः शब्दानुविद्धस्फिग्पुटीविशिष्टरूक्षिन् यत्रानन्दोबाह्यशब्दादिविषयप्रपञ्चभारत्यागप्रयुक्तोन तु चैतन्यप्रयुक्तः यथा निधिग्रहणाय प्रवृत्तस्य निधिपरिपालकभूतप्रेताद्यावृतस्य निधिप्राप्तप्रभावेऽपि भूताद्यनिष्ट निवृत्तिमात्रेण कोऽपि महानानन्दोभवति तथा सविकल्पकसमाधावखण्डवस्त्वनवलम्बनेन नित्यानन्दरसास्वादनाभावेऽपि अनिष्टबाह्यप्रपञ्चनिवृत्तिजन्यानन्दं सविकल्पकरूपं ब्रह्मानन्दभ्रमेण स्वादयति तद्रसास्वादनमित्यर्थः।

लक्षणान्तरमाह। समाधीत्यादि। निर्विकल्पकसमाध्यारम्भकाले अनुभूयमानसविकल्पकानन्दत्यागासहिष्णुतया पुनस्तस्यैवास्वादनं रसास्वादइत्यर्थः।

प्रायुक्तविघ्नचतुष्टयनिवृत्तेः फलमाह। अनेनेत्यादि। लयादिविघ्नाभावसहितं चित्तं यदा तदा निर्वातदीपवदचलमखण्डचैतन्यमात्रमवतिष्ठते तदा निर्विकल्पकः समाधिरित्यर्थः।

लयादिविघ्नसद्भावे तच्चिवृत्तिप्रकारे च वृद्धसम्मतिमाह। तदुक्तमित्यादि। पूर्वोक्तलक्षणे लये जाते सति तच्चिवृत्त्यर्थं चित्तं सम्बोधयेत् चित्तगतजाड्यादिपरित्यागेन चित्तसुबोधयेत्। उक्तविक्षेपयुक्तं चित्तं यदा भवति तदा विषये वैराग्यादिना चित्तं समुन्नयेत् बहिर्मुखवृत्तिं परित्यज्यान्तर्मुखं कुर्यात्। उक्तरागादिकषायसहितं चित्तं यदा भवेत् तदा विजानीयात् इयं रागादिवासना बाह्यविषयप्रापिका न त्वखण्डवस्तुप्रापिका अतोनेयं समीचीनेति विचिन्त्य प्रत्यक् प्रवणवासनायाः सकाशादियं निकृष्टा अतस्त्याज्येयमिति जानीयादित्यर्थः। यद्वा सम्यग्वस्तुन्मुखं चित्तं यदा भवति तदा तच्चित्तं कषायसहितं जानीयात्। तच्चित्तं यावता कालेन रागादिवासनात्रयसहितं भवति तावत् कालं तच्चित्तं स्वस्थानात् न चालयेत् न कम्पयेत् वासनात्रयान-

न्तरं चित्तं स्वतएव प्रत्यक् प्रवणं भवतीत्यर्थः। नास्वादयेदिति पूर्वोक्तं सविकल्पकरसं विषयप्रपञ्चभारत्यागजन्यं नास्वादयेत् नानुभवेत्।

तत्र युक्तिमाह। निःसङ्कल्पतेति। यतोनिःसङ्कल्पोवैषयिकसुखदुःखादिसङ्कल्परहितः अतः प्रज्ञया युक्तोभवेत् स्थितप्रज्ञोभवेदित्यर्थः। तदुक्तं भगवता, प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्। आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते इति, तस्मात्सर्वादिविघ्नाभावविशिष्टचित्तस्य चिन्मात्रतयावस्थानं निर्विकल्पकसमाधिरित्यर्थः।

तत्र भगवदुक्तमाह। यथेत्यादि। अथ निर्विकल्पकसमाधौ स्वगुरूपदिष्टमार्गेण यथागति किञ्चिद्विचार्य्यते। पञ्चभूमिकोपेतस्य चित्तस्य भूमिकात्रयपरित्यागेनावशिष्टभूमिकाद्वयं समाधिरुच्यते। कास्ताश्च भूमिकाः। क्षिप्तं, मूढं, विक्षिप्तं, एकाग्रं, निरुद्धञ्चेति पञ्च चित्तभूमिकाः। तत्रासुरसम्मोहकथारूढदेहवासनासु वर्त्तमानं क्षिप्तमित्युच्यते। निद्रातन्द्रादिग्रस्तं चित्तं मूढमित्युच्यते। कादाचित्कध्यानयुक्तं बहिर्गमनशीलमपि उक्तक्षिप्तादिविशिष्टतया विक्षिप्तं चित्तमुच्यते। तत्र क्षिप्तमूढयोः समाधिशब्दैव नास्तीति। विक्षिप्ते तु चेतसि विक्षेपान्तर्गततया दृढनान्तर्गतबीजवच्चित्तस्य सद्यएव विनाशात् तदापि न समाधिः। एकाग्रतां पतञ्जलिः सूत्रयति, शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः इति। अस्यार्थः शान्तोऽतीत उदितोवर्त्तमानः प्रत्ययश्चित्तवृत्तिः अतीतप्रत्ययोऽयं पदार्थं परित्यक्ष्यति उदितोऽपि तमेव चेद्दृष्ट्वीयात् तदा तावुभौ तुल्यप्रत्ययौ भवतः तादृशएव चित्तस्य परिणाम एकाग्रतेत्युच्यते। एकाग्रतामिवृद्धिलक्षणं समाधिं सूत्रयति, सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य परिणामः समाधिरिति। रजोगुणेन चाल्यमानं चित्तं क्रमेण सर्वानर्थान् परित्यक्ष्यति तस्य रजोगुणनिरोधाय क्रियमाणेन प्रयत्नविशेषेण दिने दिने योगिनः सर्वार्थता क्षीयते एकाग्रता चोदेति तादृशचित्तस्य परिणामः समाधिरित्यर्थः। तस्य समाधेरष्टाङ्गेषु यमनियमासनप्राणायामाहाराः पञ्च बहिरङ्गानि हिंसादिभ्योनिषिद्धेभ्योयोगिनं कर्म्मभ्योयमयन्ति निवर्त्तयन्तीत्य-

हिंसादयोयमाः। जन्महेतोः काम्यधर्माद्विवृत्त्य मोक्षहेतौ निष्काम-धर्मे नियमयन्ति प्रेरयन्तीति शौचादयोनियमाः। यमनियमयोरनुष्ठान वैलक्षण्यं दर्शयते यमान् सेवेत सततं न नित्यं नियमान् बुधः। यमान् पतत्यकुर्वाणोनियमान् केवलान् भजन्निति। बुद्ध्या यमनियमौ समीक्ष्य यमवद्धलेषु प्रयत्नेषु बुद्धिमनुसन्दधीत। आसनप्राणायामप्रत्या-हाराः व्याख्याताः। ध्यानधारणसमाधित्रयं मनोविषयत्वात् सम्प्रज्ञात समाधेरन्तरङ्गं यमादिकन्तु बहिरङ्गं, तथा च केनापि पुरुषेणान्तरङ्गे प्रथमं लब्धे सति बहिरङ्गलाभाय नातिप्रयासः कर्त्तव्यः। यद्यपि पत-ञ्जलिना भौतिकभूततन्मात्रेन्द्रियाहङ्कारविषयैः सम्प्रज्ञातसमाधयोवर्ज्जिता प्रपञ्चिताः तथापि तेषामन्तर्नाकाशगमनादिसिद्धिहेतुतया मुक्तिसमाधि-र्विघ्नित्वात् नाखाभिस्तत्रादरः क्रियते। तथा चोक्तं वशिष्ठेन, श्रीराम-उवाच, जीवन्मुक्तशरीराणां कथमात्मविदाम्बर। शक्तयोनेह दृश्यन्ते आकाशगमनादयः। वशिष्ठउवाच, अनात्मविदलुब्धोऽपि सिद्धिजालानि वाञ्छति। दृश्यमन्तक्रियाकालयुक्तप्राप्नोत्येव राघव। नात्मज्ञस्यैव विषयआत्मज्ञोह्यात्मनात्मदृक्। आत्मनात्मनि सन्तुष्टोनाविद्यामनुधा-वति। ये केचन जगद्भावास्तानविद्यामयान् विदुः। कथं तेषु किला-त्मज्ञस्तुच्छाविद्यो निमज्जति। दृश्यमन्तक्रियाकालयुक्तयः सार्वसिद्धिदाः। परमात्मपदप्राप्तौ नोपकुर्वन्ति काञ्चनेति। आत्मविषयस्तु सम्प्रज्ञात स-माधिर्वासनाक्षयस्य निरोधसमाधेश्च हेतुः तस्मात्तत्रादरः कृतः। अथ पञ्चमभूमिकारूपः चित्तस्य निरोधलक्षणः समाधिर्निरूप्यते। तत्र स-माधिं सूत्रयति, व्युत्थाननिरोधसंस्कारयोरभिभव प्रादुर्भावौ निरोध-लक्षणचित्तान्वयोनिरोधः परिणामइति। व्युत्थानसंस्काराः समाधिरो-धिनः, ते च निरोधहेतुना योगिप्रयत्नेन प्रतिदिनं प्रतिक्षणञ्चाभिभूयन्ते तन्निरोधिनश्च संस्काराः प्रादुर्भवन्ति। तथा सति निरोधे एकैकस्मिन् क्षणे चित्तमनुगच्छति सोऽयमीदृशचित्तस्य परिणामो भवति यदा तदा असंप्रज्ञातसमाधिरुच्यते इत्यर्थः।

एतत् समाधित्रयं जीवन्मुक्तस्यैव भवति नान्यस्येति मनसि निधायं

प्रथमं जीवन्मुक्तस्वरूपं प्रतिपादयितुं प्रतिजानीते। अथेत्यादि।

तस्य लक्षणमाह। जीवन्मुक्तोनामेत्यादिना ब्रह्मनिष्टत्वान्तेन। अतोऽखिलबन्धरहितोब्रह्मनिष्ठोजीवन्मुक्तइति तस्य लक्षणम्। जीवतः पुरुषस्य हि कर्त्तृत्वभोक्तृत्वसुखदुःखसकलक्षणोऽखिलोयश्चित्तधर्म्मः सक्लेशस्वरूपत्वाद्बन्धोभवति तेन रहितः परित्यक्तबन्धनः, ब्रह्मणि निष्ठा तदेकपरता यस्य सब्रह्मनिष्ठः जीवन्मुक्तइत्यर्थः।

सकलबन्धराहित्ये हेतुमाह। स्वस्वरूपेति। गुरुश्रुतिस्वानुभवैर्ब्रह्मात्मैकत्वविज्ञानेन मूलाज्ञानतत्कार्य्यसञ्चितकर्म्मादीनामपि बाधितत्वात् सर्ब्बबन्धराहित्यमुपपद्यते इत्यर्थः।

तत्रच श्रुतिमाह। भिद्यतइत्यादि।

नन्वेतादृशजीवन्मुक्तस्य देहेन्द्रियादिभानमस्ति न वेत्याशङ्क्य दग्धपटन्यायेन इन्द्रजालनिर्म्मितसौधसप्तद्वादिवच्च बाधितानुवृत्त्या मिथ्यात्वेन भानेऽपि परमार्थतया भानं नेत्याह। अयमित्यादिना न पश्यतीत्यन्तेन।

अस्मिन्नर्थे श्रुतिमाह। सचक्षुरित्यादि।

आचार्य्यवचनं प्रमाणयति उक्तञ्चेत्यादि। इह जगति सएवात्मवित् नान्यइति मे निश्चयइत्यन्वयः।

स क इत्यपेक्षायामाह। यइति। यः कोऽपि महापुरुषोब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धिः सुषुप्तावस्थादौ यथा द्वैतं न पश्यति तथाब्रह्मदृष्टिदार्ढ्येन जाग्रदवस्थायामपि द्वैतं न पश्यति तदृष्ट्या ब्रह्मव्यतिरिक्तजडपदार्थाभावात्, सयथोक्तः। किञ्च कदाचित् व्युत्थानदशायामविद्यासंस्कारलेशवशात् भिक्षाटनादिव्यवहारेण द्वयं पश्यन्नपि समाध्यभ्याससामर्थ्यवशादद्वयत्वेन पश्यति, सच तथोक्तः। यश्च लोकसंग्रहार्थं नित्यादिकर्म्माणि कुर्व्वन्नपि आत्मनि कर्त्तृत्वाभावनिश्चयेन निष्क्रियः कर्म्मरहितोभवति कर्म्मफलेन न लिप्यते सजीवन्मुक्तोनात्र संशयः कर्त्तव्यइत्यर्थः।

नन्वस्य जीवन्मुक्तस्य योगीश्वरस्य मम पुण्यपापलेशोनास्तीत्यभिमानवशात् यथेष्टाचरणमाशङ्क्य परिहरति। अस्येत्यादि। अस्य पूर्व्वो-

क्षजीवन्मुक्तं शमात् प्रागेव शान्त्यादिगुणैरशुभवासनायानिवारितत्वात् संसारदशायामप्रयत्नेनाहारादिप्रवृत्तिवत् तत्त्वज्ञानोत्तरमपि शुभानामेव वासनानामनुवृत्तिर्भवति नाशुभानामित्यर्थः।

ननु शुभवासनानामनुवृत्तेरपि प्रयोजनाभावात् किं तदनुवृत्त्या इत्यतआह। शुभेत्यादि। अस्माज्जीवन्मुक्तस्य यथेष्टाचरणप्रसङ्गो नास्तीति भावः।

अस्मिन्नर्थे अन्यान्तरं सम्वादयति। तदुक्तमित्यादि।

जीवन्मुक्तस्य ब्रह्मज्ञानित्वाभिमानो नास्तीत्यत्रापि सम्मतिमाह। ब्रह्मविच्चेत्यादि।

ननु विदुषां यथेष्टाचरणप्रसङ्गोनास्तीत्युक्तं तदनुपपन्नं, न मातृवधेन न पितृवधेन, यस्य नाहं कृतोभावोबुद्धिर्यस्य न लिप्यते। इत्यापि सदृशान् लोकान् न हन्ति न निबध्यतइति, हयमेधशतसहस्राण्यथक्रतो ब्रह्महातलक्षणीति, परमार्थवित् न पुण्येन च पापेर्लिप्यते मनुजः, अश्वमेधसहस्राणि ब्रह्महत्याशतानि च। कुर्व्वन्नपि न लिप्येत यद्येकत्वं प्रपश्यति। सभयादभयं प्राप्तं स्तदर्थं यतते च यः। सपुनः सभयं गन्तुं स्वतन्त्रश्चेन्न हीच्छति। आरब्धकर्म्मनानात्वात् बुधानामन्यथान्यथा। वर्त्तनं तेन शास्त्रार्थे विभ्रान्तव्यं न पण्डितैरित्यादिस्मृतिस्मृत्यभियुक्तवाक्यैर्विदुषां यथेष्टाचरणत्वाङ्गीकारादितिचेत्, सत्यं, तेषां वचनानां विद्वत्स्तुतिपरत्वेन तत्कर्त्तव्यमित्यत्र तात्पर्य्याभावात्। तदुक्तमाचार्य्यैः, अधर्म्माज्जायतेऽज्ञानं यथेष्टाचरणं ततः। धर्म्मकार्य्ये कथं तत् स्यात् यत्र धर्म्मोविनश्यतीति। नन्वेवमभयमित्यमदाम्भित्वमहिंसाक्षान्तिरार्ज्जवमित्यादिस्मृत्युक्तसाधनस्य, अद्वेष्टा सर्वभूतानामित्यादिवचनैः प्रतिपाद्यमानाद्वेष्टृत्वादिगुणसमूहस्य च विदुषा सम्पाद्यमानत्वश्रवणात् तेन सह विरोधमाशङ्क्याभावमित्यादिसम्पादनस्य च विविदिषासन्न्यासविषयत्वात् विदुषान्तु लक्षणत्वेनालङ्कारवदनुवर्त्तमानात् न विरोधइत्याह। तदानीमित्यादि। जीवन्मुक्तावस्थायामित्यर्थः।

अस्मिन्नर्थे वार्त्तिकसम्मतिमाह। तदुक्तमित्यादि। अस्य विद्वत्सन्न्यासिनोजीवन्मुक्तस्याद्वेष्टृत्वादयोगुणाः अप्रयत्नेन स्वतएव भवन्ति, न

सु साधनरूपिणः तं प्रति ते साधनरूपाः न भवन्ति।

तत्र हेतुमाह। उत्पन्नेति। यत उत्पन्नआत्मावबोधोब्रह्मात्मैकत्वनिश्चयरूपः अतस्तस्य ते गुणाः लक्षणत्वेनैव भवन्तीत्यन्वयः।

इयता प्रबन्धेन प्रतिपादितेऽस्मिन् वेदान्तसाराख्ये ग्रन्थे श्रीमत्परमगुरुपरमहंसपरिव्राजकाचार्यसदानन्दयोगीन्द्रेण महापुरुषेण कृष्णवेदान्तीनामेत्यारभ्य साधनचतुष्टयसम्पन्नस्य प्रमातुरविद्याकारणीभूतात्यन्तनिवृत्तिपरमानन्दप्राप्तिविषये प्रतीयमानाविद्यकसकलप्रपञ्चजातस्य ब्रह्मण्यध्यारोपापवादपुरःसरं सविस्तरं निष्प्रपञ्चत्वं प्रतिपाद्य तत्साधनञ्च श्रवणादिकं सप्रपञ्चमभिधाय तस्यैवाधिकारिणस्तत्त्वमस्यादिश्रवणानन्तरं ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धेर्जीवन्मुक्तत्वं प्रदर्शितं एतावतैव कार्यसिद्धिः किं बहुलेखनेनेति मनसि निधाय समस्तिअस्यैव जीवन्मुक्तस्य स्वप्रकाशात्मानन्दानुभवैकनिष्ठस्य भेदप्रतीत्यभावेऽपि अविद्यालेशवशात् प्रारब्धं कर्म्मभुञ्जानोभिक्षाटनादिदेहयात्रामात्रक्लिष्टाविशिष्टोब्रह्मीभूतएवावतिष्ठते इत्युपसंहरति। किं बहुनेत्यादिना। प्रारब्धं त्रिविधं स्वेच्छाकृतं भिक्षाटनादि, समाध्यवस्थायां विघ्नादिभिर्दीयमानमस्त्रादिकं परेच्छाकृतं, समाध्यवस्थायां व्युत्थानदशायां वा आकाशफलपातवत् अकस्मात् जायमानं पाषाणपतनकण्टकवेधादिकमनिच्छाकृतम्। सचायं जीवन्मुक्तः प्रोक्तत्रिविधप्रारब्धप्राप्तिं सुखदुःखमनुभवन् बुद्ध्यादिसाक्षितया सर्व्वावभासकः सन् भोगेनारब्ध कर्म्मक्षये सति प्रत्यगभिन्नपरमात्मनि प्राणादिलयानन्तरं प्रनष्टाविद्यकसंसारः कृतकृत्यः सन् गलितसकलभेदप्रतिभासोब्रह्मैवावतिष्ठते इति सकलवेदरहस्यतात्पर्य्यमित्यर्थः। अयं जीवन्मुक्तोबुद्ध्याद्युपाधिविलये सति घटाद्युपाधिविनिर्म्मुक्ताकाशवन्मुक्तइत्युपचारव्यवहारभाग्भवति बन्धत्वस्यापि अवास्तवत्वात्। तदुक्तमाचार्य्यैः, न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वा मुक्तइत्येषा परमार्थता इति। अस्य जीवन्मुक्तस्योपाधियिगमसमये प्राणाख्यलिङ्गशरीरस्य अतिसूक्ष्मोऽक्षिप्तनीरयद्वत्प्रत्यगभिन्नपरमानन्दलीनत्वात् स्थूलशरीरं भोक्ष्यतीति।

तत्र श्रुतिमाह। न तस्येत्यादि।

अयं जीवन्मुक्तोऽजीवन्नेव दृश्यमानात् रागद्वेषादिबन्धनात् विशेषेण मुक्तः स्यात् वर्त्तमानदेहपाते सति भाविदेहबन्धात् विशेषेण मुच्यते इत्यत्रापि श्रुतिमाह। विमुक्तश्चेति। बृहदारण्यकेऽपि, यदा सर्वे प्रमुच्यन्ते कामायेऽस्य हृदि स्थिताः। अथमर्त्योऽमृतोभवत्यत्र ब्रह्म समश्नुते इति। वाशिष्ठेऽपि, जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते। भवत्यदेहमुक्तत्वं पवनः स्पन्दतामिवेति। असङ्गोह्ययं पुरुषः, आकाशवत् सर्व्वगतश्च नित्यः, अस्नाविरं शुद्धमपापविद्धमित्यादिश्रुत्या प्रत्यगात्मनोनित्यत्वपरिपूर्णत्वकूटस्थत्वश्रवणात् उत्पत्त्याप्तिविकृतिसंस्कारचतुर्व्विधक्रियाफलविलक्षणत्वेन विद्यया नित्यनिवृत्ताविद्यानिवृत्तिमात्रेण प्राप्त एवात्मा पुनः प्राप्त इत्युपचर्य्यते। अधिष्ठानस्य गमनाभावे अध्यस्तस्य लोकान्तरगमनायोगात् न सालोक्यादिमुक्तिसम्भवः।

ननु अप्राप्तस्य क्रियासाध्यस्य वस्तुनोविद्यमानानर्थनिवृत्तेश्च पुरुषार्थत्वं दृष्टं अत्र तदभावात् कथं पुरुषार्थत्वमिति चेत् न अनयोरेव पुरुषार्थत्वमिति नियमाभावात्, स्वच्छायायामारोपितरज्जसोधिकृतकण्ठगतचामीकरस्य भ्रान्तपुरुषस्याप्तवाक्येन तयोर्निवृत्त्याप्तेरपि पुरुषार्थत्वदृष्टेः। अत्र संग्रहः। आत्माज्ञानमलं निरस्तममलं प्राप्तञ्च तत्त्वं परं कण्ठस्थाभरणादिवद्भ्रमयाच्छायापिशाची यथा। आप्तोक्त्याप्तिनिवृत्तिवत् श्रुतिशिरोवाक्यात् गुरोरित्यतान्तुलब्धान्निरायतः परसुखं प्राप्तं तयोरुच्यते इति।

न च मुक्तानामपि वशिष्ठभीष्मप्रभृतीनां अपरोक्षज्ञानिनां पुनर्देहान्तरश्रवणात् केवलं ज्ञानोत्पत्तिसमय एवात्मज्ञानानामस्माकं मुक्तिर्भवतीति कथं विश्वसिमः, अतोज्ञानव्यतिरिक्तमपि उपायान्तरं किञ्चित् कर्त्तव्यमिति वाच्यं शास्त्रप्रामाण्यादेव तदुपपत्तेः। ब्रह्म वेद ब्रह्मैव भवति, तरति शोकमात्मवित्, इत्यादिश्रुतिभिर्ज्ञानोत्पत्तिसमयमेव मुक्तिप्रतिपादनात्। तदुक्तं श्रेष्ठेन, तीर्थे स्वपचगृहे वा मदभक्तिरविमर्दितजन्तु देहम्। ज्ञानसपकाशे मुक्तः कैवल्यं याति हतशोक इति।

वशिष्ठादीनान्त्वाधिकारिकपुरुषत्वेन यावदधिकारं प्रारब्धवेगप्रयुक्तशरीरादिना स्वीकृतावान्तरदेहपातेऽपि तद्देहभाविभोगस्य निवारयितु मशक्यत्वात् प्रारब्धस्य विना भोगेन क्षयानुपपत्तेः । यावदधिकारमवस्थितिराधिकारिकाणामिति भगवद्व्यासैर्व्यवेधितत्वात् । अस्मदादीनाञ्च प्रारब्धकर्म्मणोऽनेकदेहारम्भकत्वसम्भवेऽपि चरमदेहं विनापरोक्षज्ञानोत्पत्तिरसम्भवात् वामदेवे तथा दृष्टत्वात्, अन्यथा गर्भस्थस्य श्रवणाद्यभावेन ज्ञानोत्पत्त्यनुपपत्तेः । ननु ज्ञानिनामपि स्वप्नावस्थायां देहान्तरस्वीकारवत् मुक्तानामपि पुनर्देहान्तरस्वीकारः किं न स्यादिति चेन्न, कण्ठे स्वप्नं समाविशदित्यादिवाक्येषु कण्ठाच्छिर्गमनाभावश्रवणात्, देहान्तरप्राप्तेस्तु तदन्तरप्रतिपत्तावित्यत्र देहान्निर्गमनश्रवणात् वैषम्यम् । तदुक्तं स्कान्दे, यस्मिन् देहे दृढं ज्ञानमपरोक्षं विजायते । तद्देहपातपर्य्यन्तमेव संसारदर्शनम् । पुरापि नास्ति संसारदर्शनं परमार्थतः । कथं तद्दर्शनं देहविनाशादूर्द्ध्वं मुच्यते । तस्माद्ब्रह्मात्मविज्ञानं दृढं चरमविग्रहे । जायते मुक्तिदं ज्ञानप्रसादादेव मुच्यते इति । तस्मात् मुक्तश्च विमुक्तश्च विमुच्यते इति ।

नित्यशुद्धपरिपूर्णमद्वयं सच्चिदात्मकमखण्डमक्षरम् ।
सर्व्वदा सुखमबोधतत्कृतैर्व्वर्ज्जितं सदसदस्मि तत् परम् ॥
गोवर्द्धनप्रेरणया विमुक्ते चेतसे पवित्रे नरसिंहयोगी ।
वेदान्तसारस्य चकार टीकां सुबोधिनीं विश्वपतेः पुरस्तात् ॥
जाते पञ्चशताधिके दशशते सम्वत्सराणां पुनः
मासाते शतवत्सरे प्रभुवरः श्रीशालिवाहे शके ।
प्राप्ते दुर्म्मुखवत्सरे शुभशुचौ मासेऽनुमत्यान्वितौ
प्राप्ते भार्गववासरे नरहरिर्टीकाञ्चकारोज्ज्वलाम् ॥

इति श्रीपरमहंसपरिव्राजकाचार्य्य श्रीमत् कृष्णानन्दपूज्यपादशिष्य श्रीनृसिंहसरस्वतीकृता वेदान्तसारटीका सुबोधिन्याख्या समाप्ता ।

हस्तामलकम् ।

कस्त्वं शिशो क्वस्य कुतोऽसि गन्ता किं नाम ते त्वं कुत आगतोऽसि ।
एतद्वद त्वं मम सुप्रसिद्धं मत्प्रीतये प्रीतिविवर्द्धनोऽसि ॥
नाहं मनुष्यो न च देवयक्षौ न ब्राह्मणक्षत्रियवैश्यशूद्राः ।
न ब्रह्मचारी न गृही वनस्थो भिक्षुर्न चाहं निजबोधरूपः ॥
निमित्तं मनश्चक्षुरादिप्रवृत्तौ निरस्ताऽखिलोपाधिराकाशकल्पः ।
रविर्लोककचेष्टानिमित्तं यथा यः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ १ ॥

हस्तामलकभाष्यम् ।

यस्मिन् ज्ञाते भवेत् सर्वं विज्ञातं परमात्मनि । तं वन्दे नित्यविज्ञानमानन्दमजमव्ययम् । यदज्ञानादभूत् द्वैतं ज्ञाते यस्मिन्निवर्त्तते । रज्जुसर्पवदत्यन्तं तं वन्दे पुरुषोत्तमम् । यस्योपदेशदीपित्या चिदात्मा नः प्रकाशते । नमः सद्गुरवे तस्मा अविद्याध्वान्तभास्वते ।

इह खलु सर्वजन्तोः सुखं मे भूयात् दुःखं मा भूदिति स्वरसतः सुखोत्पादित्सा दुःखजिहासे भवतः, तत्र कश्चित् पुण्यातिशयशाली अवश्यम्भाविदुःखाविनाभूतत्वात् अनित्यत्वाच्च विषयसुखं दुःखपङ्के निःक्षिप्य संसारादत्यन्तं विरज्यते, विरक्तः संसारहानौ यतते संसारस्य चात्मस्वरूपाज्ञानहेतुत्वात् आत्मज्ञानाच्चिवृत्तिरिति तं प्रत्यात्मज्ञानमुपदिशत्याचार्यः । ननु सर्वत्र ग्रन्थादौ शिष्टानामिष्टदेवतानमस्कारस्तुतिपूर्विका प्रवृत्तिरुपलब्धा अयञ्च विना स्तुतिनमस्कारं प्रवर्त्तमानोऽशिष्टत्वादनवधेयवचनः प्रसज्येत, न, स्तुतिनमस्कारयोस्त्रैविध्यात्, त्रिविधौ स्तुतिनमस्कारौ कायिकौ वाचनिकौ मानसौ चेति, अत्र कायिकवाचनिकयोरभावेऽपि परमशिष्टत्वादाचार्यस्य ग्रन्थस्याविघ्नेन परिसमाप्तेश्च मानसस्तुतिनमस्कारावकार्षीदयमाचार्यः इत्यवगम्यते, यत् किञ्चिदेतत् प्रकृतमनुसरामः । निमित्तमित्यादि ।

मनश्च चक्षुश्च मनश्चक्षुषी ते आदिनी येषां तानि मनश्चक्षुरादीनि ।

यमग्नुष्णवच्चित्यबोधस्वरूपं मनश्चक्षुरादीन्यबोधात्मकानि ।
प्रवर्त्तन्तआश्रित्य निष्कामभेकं स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ २ ॥

आदिशब्दः प्रत्येकमभिसम्बध्यते, ततश्चायमर्थोभवति, मनआदीनां मनोबुद्ध्यहङ्कारचित्तानां चतुर्णां अन्तःकरणानां तथा चक्षुरादीनां चक्षुस्त्वक्श्रोत्रजिह्वानासिकानां पञ्चबुद्धीन्द्रियाणां एवं वाक्पाणिपादपायूपस्थानां पञ्चकर्मेन्द्रियाणां प्रवृत्तौ स्वस्वव्यापारे निमित्तं हेतुर्यः सोऽहमात्मेति । नित्योपलब्धिस्वरूपः, नित्या चासावुपलब्धिश्चेति सा स्वरूपं यस्य स तथोक्तः । रविरादित्यो यथा येन प्रकारेण प्रकाशकत्वेन लोकानां चेष्टायां परिस्पन्दने निमित्तं तथैवाधिष्ठातृत्वेन योनिमित्तमित्यर्थः । एवमात्मज्ञाने उपायत्वे दर्शिता प्रक्रिया, परमार्थतस्तु निरस्ता निराकृता अखिला निरवशेषा उपाधयो बुद्ध्यादिलक्षणा यस्य स तथोक्तः । निरस्ताखिलोपाधित्वादेवाकाशकल्पः आकाशवत् विभुत्वो यः सोऽहमात्मेति सम्बन्धः ॥ १ ॥

ननु मनश्चक्षुरादीनां प्रवृत्तौ किमर्थमधिष्ठातेष्यते स्वयमेव कथं न प्रवर्त्तते कथञ्च नित्योपलब्धिस्वरूपत्वमधिष्ठातुरित्यतआह । यमित्यादि ।

यं नित्यबोधस्वरूपमात्मानं आश्रित्य मनश्चक्षुरादीनि प्रवर्त्तन्ते सोऽहमात्मेति सम्बन्धः । ननु कथं बोधस्य नित्यता बोधोहि नाम ज्ञानं तच्च इन्द्रियार्थसन्निकर्षादेव समुत्पद्यते उत्पन्नञ्च स्वकार्यसंस्कारेण विरोधिज्ञानान्तरेण च विनश्यति अतउत्पत्तिविनाशशालित्वाद्नित्यं भवितुमर्हति, नापि बोधस्वरूपआत्मोपलभ्यते नित्यत्वात् आत्मनोऽनित्यत्वाच्च बोधस्य, न हि नित्यानित्ययोरेकस्वभावत्वं विरोधात्, अत्रोच्यते, बोधोहि नाम चैतन्यमभिधेयं न च ज्ञानं चैतन्यं तस्य ज्ञेयत्वेन घटादिवत् जड़त्वात्, ज्ञेयं हि घटः ज्ञानांशे जातमित्यस्य साक्षादनुभूयमानत्वात्, अतस्तस्यानित्यत्वेऽज्ञातृरूपत्वेऽपि नित्यबोधस्वरूपत्वमात्मनोनायुक्तमिति । ननु आत्मनश्चैतन्यत्वे किं मानं, जगत्प्रकाशयतीति ब्रूमः, जगत् प्रकाशते इति सर्वजनप्रसिद्धं अत ज्ञानादीनां

ज्ञेयत्वेन जड़त्वात् आत्मप्रकाशेनैव जगत्प्रकाशइति निश्चितं भवति सवितृप्रकाशवत्, यथा सविता स्वयं प्रकाशमानो जगत् प्रकाशयति एवमात्मापीति । अस्तु तर्हि चिद्धर्मः पुरुषः कथमयं चित्स्वभावइति न धर्मधर्मिभावस्यानुपपत्तेः, तथाहि चैतन्यमात्मनोभिन्नमभिन्नं वा भिन्नाभिन्नं वा इति, न तावत् भिन्नं भिन्नत्वे आत्मघटादिवत् धर्मधर्मित्वानुपपत्तेः । ननु घटादिरसम्बन्धादात्मधर्मोन भवति चैतन्यन्तु आत्मसम्बन्धीति युक्तमात्मधर्मित्वमिति न सम्बन्धानुपपत्तेः, सम्बन्धोहि भवन् संयोगोवा स्यात् समवायोवा सम्बन्धान्तरस्यात्राभावात् अत्र संयोगस्य द्रव्यधर्मत्वात् अद्रव्यत्वाच्चैतन्यस्य न तत् संयोगः, अपि समवायः अनवस्थापातात् तथाहि समवायोहि समवायिनः सम्बद्धोऽसम्बद्धोवा न तावत् असम्बद्धः घटादिवदकिञ्चित्करत्वात् सम्बद्धश्चेत् संयोगादेरभावेन समवायान्तरमुपगन्तव्यं एवमपरापेक्षयाऽनवस्थापातइति यत्किञ्चिदेतत् तस्माद्भिन्नत्वपक्षे धर्मधर्मिभावः सर्वथा नोपपद्यते । अभेदपक्षे तु बोधस्यात्मरूपत्वमेवेति सुतरां धर्मधर्मिभावो नास्ति न हि तस्य तदेव धर्मो भवति न हि शुक्लः शुक्लस्य धर्मोऽतस्तस्माद्भिन्नाभिन्नपक्षोऽवशिष्यते तस्मिन्नेकदा एकस्माद्भिन्नमभिन्नं वा भवितुमर्हति विरोधात् अतोच्यते प्रत्यक्षसिद्धत्वात् भेदाभेदावविरुद्धौ यथा गौरयमिति पिण्डाद्व्यतिरेकेण गोत्वं प्रतीयते तदेव पिण्डान्तरे प्रत्यभिज्ञायमानत्वाद्भेदेनावगम्यते अतः प्रत्यक्षेणैव भेदाभेदयोः प्रतीयमानत्वात् अविवादइति, नैतत् साधु मन्दामर्षे प्रत्यक्षस्यान्यथा सिद्धत्वात्, भिन्नमपि हि वस्तु प्रत्यक्षेणात्यन्तसन्निधानादिदोषादभिन्नवत् प्रतीयते, यथा दीपज्वाला भिन्नापि कुतश्चित् कारणात् अभिन्नवत् प्रतिभासते यथा वा एकस्माच्चन्द्रात् द्वितीयचन्द्रइति अतः प्रत्यक्षस्यान्यथासिद्धत्वात् न तेन प्रमाणसिद्धस्य भेदाभेदविरोधस्य प्रतिक्षेपोयुक्तः । अथैवमुच्यते चैतन्यस्य द्वे रूपे स्तः आत्मस्वरूपता चैतन्यस्वरूपता चेति, तत्रात्मस्वरूपतयात्मनो न भिद्यते चैतन्यस्वरूपतया भिद्यते च अतोरूपाभ्यां भिन्नाभिन्नत्वमविरुद्धमिति तदपि

न धर्म्मधर्म्मित्वाभावात्, तथाहि येन रूपेण तदभिन्नं न तेन रूपेण धर्म्मत्वमभिन्नमेवेत्यवोचं येन रूपेण स्वरूपेण भिन्नं न तेनापि धर्म्मत्वं भिन्नत्वाद्घटादिवदयुक्तं । यच्चोक्तं रूपारूपाभ्यां भिन्नाभिन्नत्वमिति तदपि विचारं न सहते ते रूपे किं चैतन्यादिभिन्ने अभिन्ने वा भिन्नाभिन्ने वा न तावत् भिन्ने भिन्नत्वे घटादिवदकिञ्चित्करत्वात्, अभिन्नत्वे चैतन्यमात्रमेवेति न ताभ्यां भिन्नाभिन्नत्वं, भिन्नाभिन्नत्वञ्च विरोधादयुक्तं तयोरपि भिन्नाभिन्नत्वाभ्यां भिन्नाभिन्नत्वाभ्युपगमेऽनवस्थापातदूरत्यलमतिविस्तरेण, तस्मान्नात्मा सर्वथा चिद्रूपः किन्तर्हि चित्स्वरूपएवेति । एतेन सदानन्दयोरप्यात्मस्वरूपत्वं व्याख्यातं नित्यश्चात्मा सत्कारणवत्त्वात् परमात्मवत् सच्चात्मा अहमभीति प्रतीयतेऽकारणवांश्च न ह्यस्य दृश्यकारणं प्रत्यक्षादिभिरुपलभ्यते नापि श्रूयते त्रैलोक्यकारणता ह्यात्मनः श्रूयते, तस्माद्वा एतस्मादात्मन आकाशः सम्भूतइत्यादिश्रुतिभ्यः, न ह्यात्मनोऽपि कारणान्तरं श्रुतः कारणात् नित्यश्चात्मेति सिद्धं तस्मात् साधूक्तं नित्यबोधस्वरूपमिति । तत्रैव दृष्टान्तमाह । यथोष्णत्वमग्नेरिति । यथा उष्णत्वमग्नितो न व्यवच्छिद्यते व्यतिरेकेण हि कदाचिदप्युष्णत्वाद्युपलभ्यते यथा पुरुषाद्गुणः न चैवमस्ति तस्मादग्निस्वरूपमेवोष्णत्वं एवमात्मनोऽपि चैतन्यस्वरूपत्वमित्यर्थः । तथाचोक्तं निरंशत्वाद्विभुत्वाच्च तथा नश्वरभावतः । ब्रह्मव्योम्नोर्न भेदोऽस्ति चैतन्यं ब्रह्मणोऽधिकं इति । ननु मनश्चक्षुरादीनां प्रवृत्तौ किमर्थमधिष्ठानमिष्यते स्वयमेव कस्माच्च प्रवर्त्तते इत्यत आह अबोधात्मकानीति । हेतुगर्भितं विशेषणं, ततश्चायमर्थोभवति अबोधात्मकत्वाद्चैतन्यत्वात् घटादिवत् चेतनमधिष्ठातारमाश्रित्य प्रवर्त्तन्ते इति, अचेतनत्वञ्चैषां ज्ञेयत्वात् घटादिवत्, श्रुतिरपि नान्योऽतोऽस्ति द्रष्टेत्यादया आत्मव्यतिरिक्तस्य चैतन्यं प्रतिषेधति अतोयुक्तमुक्तं चैतन्यमात्मानमाश्रित्य प्रवर्त्तन्तइति । निष्कम्पं निस्तरङ्गं निःसंशयमित्यर्थः, तथाचश्रुतिः, भिद्यते हृदयग्रन्थिरित्यादया । एकञ्चाद्वितीयं एकं सत्त्वं देवतिर्य्यङ्मनुष्यादिशरीरेष्वेकं न तु सांख्यादिपरिकल्पितवस्त्वनाभूतमित्यर्थः ॥२॥

सुखाभासको दर्पणे दृश्यमानो सुखत्वात् पृथक्त्वेन नैवास्ति वस्तु ।
चिदाभासको धीषु जीवोऽपि तद्वत् स नित्योपलब्धिस्वरूपोऽहमात्मा ॥२॥

ननु आत्मन एकत्वे सुखदुःखादिव्यवस्था न स्यात्, तथाहि यदि सर्वशरीरेष्वेकएवात्मा भवेत् तदैकस्मिन् सुखिनि सर्वएव सुखिनः स्युः एकस्मिन् दुःखिनि सर्वएव दुःखिनः स्युः एकस्मिन् जानति सर्वएव जानीयुः तथैकस्मिन् जायमाने म्रियमाणे वा सर्वएव जायेरन् सर्वएव म्रियेरन् तथैकस्मिन् बद्धे मुक्ते वा सर्वएव बध्येरन् सर्वएव मुच्येरन् इति न चैवमस्ति तस्मादैकत्वमात्मनोऽभवितुमर्हतीति अतआह । सुखेत्यादि ।

अस्यायमर्थः सुखाभासको सुखप्रतिबिम्बोदर्पणे दर्पणजातौ नानाप्रकारेषु जलतैलकाचप्रभृतिष्विति यावत् दृश्यमानोसुखत्वात् परमार्थसतोसुखरूपात् पृथक्त्वेन भेदेन नैवास्ति वस्तु, यद्यपि सुखाभासकोनाम वस्तु नास्त्येव तथाप्युपाधिभेदात् परमार्थसतोसुखात् परस्परञ्च सुखाभासका भिन्नाः प्रतीयन्ते अथच उपाधिगतमलिनत्वादितद्धर्म्मैर्म्मलिनत्वादिधर्म्मकाः प्रतीयन्ते तद्वत् परमार्थसन्मुखाभासकवत् चिदाभासकआत्मप्रतिबिम्बः धीषु बुद्धिषु दृश्यमानो जीवइत्युच्यतेयः सोऽहमात्मेति, जीवास्तूपाधिगतभेदभिन्नाः प्रतिभासन्ते उपाधिगतसुखदुःखादिमन्तःप्रतीयन्ते, उपाधयश्च व्यवस्थितरूपाएवेति सुखदुःखादीनामेकात्मपक्षे व्यवस्था युक्ता इति नानयात्मभेदः शक्यो व्यवस्थापयितुम् । श्रुतिश्चैकात्म्यमेव प्रतिपादयति एकमेवाद्वितीयं ब्रह्मेति सजातीयविजातीयस्वगतभेदं निराकरोति, आत्मभेदपक्षे त्वियं सुखदुःखादिव्यवस्था नोपपद्यते तथाच प्रतिशरीरमात्मानोभिन्नाः ते च सर्वे प्रत्येकं सर्वगताइति आत्मभेदवादिनो मन्यन्ते, तत्र सर्वेषां सर्वगतत्वात् सर्वसन्निधौ सुखादिकं उत्पद्यमानं विशेषहेतोरभावात् कथमेकस्य तत् सुखादिकं न सर्वेषामित्यवधार्य्यते, अथ यत् सम्बन्धिना कार्य्यकारणसङ्घातेन सुखादिकं जन्यते तस्यैव तदभिधीयते तस्य तत्कार्य्यकारणसङ्घातस्यापि सर्वसन्निधावुत्पद्यमानस्य विशेषहेतोरभावादेव कथमेकात्मसम्बन्धित्वमिति, अथ यत्कर्म्मवशात् कार्य्यकारणसङ्घातादुत्पत्तिस्तस्यैवासौ कार्य्यकारणसङ्घातो विशेषहेत-

यथा दर्पणाभावऽऽभासहानौ सुखं विद्यते कल्पनाहीनमेकम् ।
तथा धीवियोगे निराभासको यः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥४॥
मनश्चक्षुरादेर्विमुक्तः स्वयं योमनश्चक्षुरादेर्मनश्चक्षुरादिः ।
मनश्चक्षुरादेरगम्यस्वरूपः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ५ ॥
इति चेन्न कर्मणोऽपि सर्वात्मसन्निधावुत्पद्यमानस्य सर्वात्मसम्बन्धित्वेन तज्जनितकार्यकरणसङ्घातस्यापि सर्वात्मसम्बन्धात् तज्जनितसुखदुःखादेः सर्वात्मसम्बन्धित्वमिति सुखादिकस्य नानात्वपक्षएवानवस्थेति पूर्वपूर्व-कार्यकारणसङ्घातस्यापि कर्म्मापेक्षायामनवस्थादोषः । अनादित्वे नानवस्थादोषः परिहारस्यान्धपरम्परयेति । श्रुतिरपि आत्मनानात्वं प्रतिषेधति एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किञ्चन इत्यादिका । अतः साधूक्तमेकमिति ॥ ६ ॥

ननु एवं सति आत्मनः सुखदुःखादिसम्बन्धाभावात् बन्धाभावः बन्धाभावान्मोक्षाभावः बद्धोहि मुच्यते नाबद्धइति तथा चिदाभासकस्यापि बन्धमोक्षौ न विद्येते अवस्तुत्वात् तस्य बुद्धेरपि विनाशित्वात् बन्धमोक्षयोरभावः ततश्च बन्धमोक्षशास्त्रमनर्थकमित्याह । यथेत्यादि ।

यथा येन प्रकारेण दर्पणस्याभावे सति आभासस्य सुखप्रतिबिम्बस्य हानौ सत्यां सुखं परमार्थसत् कल्पनाहीनं मिथ्याज्ञानरहितं एकमेव परं विद्यते अस्ति तथा तनैव प्रकारेण धीवियोगे बुद्धेरभावे सति निराभासको निर्वृतिबिम्बः परमार्थसच्चैकएव यः सोऽहमात्मा । अयमभिप्रायः, आत्मनोऽज्ञानादिकृतोऽयं बुद्ध्यादिप्रपञ्चः तत्र बुद्ध्यादौ प्रतिबिम्बरूपेण आत्मानमध्यस्य तद्गतसुखदुःखादिकमात्मन्यध्यस्यते इति सोऽयमध्यासोबन्धः आत्मज्ञाने भूतेऽज्ञाननिवृत्तौ बुद्ध्यादिप्रपञ्चनिवृत्तौ अध्यासनिवृत्तिर्मोक्षः न पुनः परमार्थौ बन्धमोक्षौ विद्येते इति सर्वं समञ्जसम् ॥४॥

केचिदिह खलु देहादीनामात्मत्वं मन्यन्ते तान् प्रत्याह । मनइति ।

मनआदेश्चक्षुरादेर्विमुक्तः पृथग्भूतोयः सोऽहमात्मेति सम्बन्धः । मनश्चक्षुरादेरुपादानेन तद्युक्तत्वात् शरीरमपि उपात्तं द्रष्टव्यं, एतेन शरीरादपि विमुक्तइतिगम्यते, तथाच गुरुः, बुद्धीन्द्रियशरीरेभ्योभिन्नआत्मा

य एको विभाति स्वतः शुद्धचेताः प्रकाशस्वरूपोऽपि नानेव धीषु ।
शरावोदकस्थो यथा भानुरेकः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ६ ॥

विभुर्भुवम् । नानारूपः प्रतिचेते आत्मवृत्तिषु भासते, इति । कथं मनश्चक्षुरादेर्विलक्षणआत्मा अतआह । स्वयमिति । स्वयं य आत्मा प्रकाशते मनश्चक्षुरादिकस्य प्रकाशस्य मनश्चक्षुरादिरिव मनश्चक्षुरादिः प्रकाशगुणयोगात् अयमात्मा यथा बाह्यघटपटादेः प्रकाशको मनश्चक्षुरादिरतोऽतिरिच्यते तथान्तरस्यापि मनश्चक्षुरादेः प्रकाशकआत्मा ततोऽतिरिक्तइति निश्चीयते अतएव मनश्चक्षुरादीनां अनात्मत्वं सिद्धं ज्ञेयादन्योज्ञाता स्यात् । ननु आत्मनोऽपि ज्ञेयत्वादनात्मत्वं प्रसज्येत इत्यत आह । मनइति । मनश्चक्षुरादेरगम्यस्वरूपोऽप्रकाश्यस्वरूपस्तथा च श्रुतिः, यतो-याचो निवर्त्तन्ते अप्राप्य मनसा सह इत्यादिका ॥ ५ ॥

ननु यद्ययमात्मा मनश्चक्षुरादेरगम्यस्वरूपः तदा कथमस्य सिद्धिः घटपटादयोहि मनश्चक्षुराद्यधीन सिद्धयोदृष्टाः अतआत्मापि तदधीन-सिद्धियुक्तः अथ तदधीनसिद्धिर्यदि न स्यात् तदा सिद्धिरेव न स्याच्छशविषाणवत् इत्यतआह । यइत्यादि ।

यइति स्वतः सिद्धतामाह । योह्येकोऽद्वितीयोविभाति प्रकाशते स्वतः स्वयमेव न परतः शुद्धं निर्म्मलं चेतोयस्य स तथा शुद्धे चेतसि स्वयमेवात्मा प्रकाशते स्फुरतीत्यर्थः, अतएव सत्त्वशुद्ध्यर्थं वेदेऽपि वेदानु-वचनाद्योविहिताः, तमेतं वेदानुवचनेन इत्यादयः । घटपटादयश्च जड़त्वात् प्रकाशान्तरापेक्षत्वाच्च अप्रकाशाद्वतियुक्तं आत्मातु प्रकाशस्वरूप-त्वात् प्रकाशान्तरानपेक्ष्यः प्रकाशते सवितृप्रकाशवत्, यथा सविता स्वप्रकाशे प्रकाशान्तरं नापेक्षते तथाच प्रकाशते तद्वदात्मापीति भावः । एवम्भूतात्मज्ञानोऽद्वितीयोजीवन्मुक्तः प्रकाशस्वरूपोऽपि परमार्थतो नानाधीषु नानेव भाति यः सोऽहमात्मेति सम्बन्धः । शरावोदकेष्ववस्थितो यथा भानुरादित्यः प्रकाशस्वरूपोऽप्येकः सन्ननेकवद्भाति तद्वदात्मापीति भावः । ननु कोऽयं जीवन्मुक्तः देहवांश्च जीवन्मुच्यते तस्य जीवतो यदि देहा-भावो मुक्तिरभिप्रेयते नासावुत्पद्यते विरोधात् नहि देहयतोदेहाभावः

सम्भवति, अथ सत्यपि देहे भोगविदेहो मुक्तिरिति तदपि न चतुरस्रं सर्वभोगकरणेन्द्रियसम्पत्तौ भोगविच्छेदस्यासम्भावनीयत्वात्, अथ मिथ्याज्ञाननिबन्धनोहि भोगः तस्य सम्यक् ज्ञानेन निवर्त्तितत्वात् भोगविच्छेदः इति चेन्न बाधितस्यापि मिथ्याज्ञानस्य द्विचन्द्रादिज्ञानवत् अनुवृत्त्यभ्युपगमात् अन्यथा देहवानेव नस्यात् अतएव विदुषां जनकादीनां राज्यं श्रूयते, श्रुतिरपि देहवतोभोगविच्छेदं वारयति नहवै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत इति तस्मादयुक्ता जीवन्मुक्तिरिति, अत्रोच्यते जीवतश्च तावत् तत्त्वज्ञानमुत्पद्यते न मृतस्य समदमादेः अवश्यमननादेश्च ज्ञानहेतोर्मृतस्यासम्भवात्, अतएव विदुषो याज्ञवल्क्यस्य सन्न्यासः श्रूयते नच मृतस्य सन्यासः श्रूयते सम्भवति वा तस्माज्जीवतस्तत्त्वज्ञानमुत्पद्यतइति सिद्धं तत्त्वज्ञानादेव मुक्तिः सिद्धा स योहवै तत् परमभित्यादिश्रुतिभ्यः । न च ज्ञानस्य मोक्षफलत्वे श्रुतिषु सहकार्यन्तरं श्रूयते ज्ञानमात्रश्रवणात्, भिद्यते हृदयग्रन्थिरित्यादि, सहकार्यन्तरप्रतिषेधश्च श्रूयते तमेव विदित्वातिमृत्युमेति इति ननु श्रुतिरेव ज्ञानसहकारिणो मरणान्मुक्तिं दर्शयति तस्य तावदेव चिरं यावन्न विमोक्षे अथ सम्पत्स्ये इति पूर्वोत्पन्नस्य ज्ञानस्य चिरप्रवृत्तत्वात् मरणकाले सन्निपयितुमशक्तेस्तत्कालएव उत्पन्नज्ञानात् मुक्तिरिति चेन्न एतदेवं यजेदेव तदेव ब्रूहीति, आचार्यवान् पुरुषो वेदेति च श्रूयते प्रथमं यज्ज्ञानं ततएव मुक्तिरिति अतएतेन वचनान्तरमनुवादीतं भवति जीवन्नेवहि विद्वान्कृपामर्थ्यां विमुच्यते नचेह नहवै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुत्यन्तरविरोधः श्रूयते सामान्यविषयत्वात् अतएव विद्वानिति विशेषनिर्देशात् तस्य तावदेव चिरमिति श्रुतिस्मृत्या दानि चेन्न व्यवस्थयोपपत्तेः तथाहि मुक्तिः खलु स्वाभाविकी सर्वेषां न ज्ञानेन जन्यते किं तर्हि अविद्यातिमिरतिरोहितायां तमोमात्रं निराक्रियते तस्य प्रथमज्ञानेनैव कृतं तथाप्यविद्याकार्य्यदेहादियशात् पुनर्मोहान्धकारोऽसाधारणं कृतमपि तिरस्क्रियतइति तस्य तिरस्कारभावस्य देहादेर्विच्छे-

दात् विच्छेदोभवति एवं सति प्राचीनमेव महान्धकारोऽसाधारणं ज्ञानमात्रनिबन्धनमवतिष्ठते यथा सूर्योदयेन महातिमिरेऽसाधारणे क्षते पुनश्चक्षुरादिक्षतस्य तिमिराभासस्य क्षत्वादियिगमे विगमः ततः प्राचीनमेव महातिमिरेऽसाधारणं सूर्योदयमात्रनिबन्धनमवतिष्ठते तस्माच्च ज्ञानान्तरादेव मुक्तिरिति सिद्धं, न च श्रुतिसिद्धमनेन निराक्रियते । ननु च पारमार्थिकमद्वैतं मिथ्याज्ञानविजृम्भितः प्रपञ्चइति श्रुत्यर्थोऽवधारितः तत् कथं सत्यपि बाधके प्रपञ्चानुवृत्तिः, नहि सत्येव शुक्तिज्ञाने रजतप्रपञ्चोऽनुवर्त्तते, अत्रोच्यते नेति नेति नह्येतस्मादिति नित्यादन्यत् परमस्ति नेहनानास्ति किञ्चन इत्यादिवाक्यात् प्रपञ्चप्रत्ययप्रविलयद्वारेणासन्दिग्धमवधारितज्ञानं तावत् उत्पद्यते न च तत् प्रपञ्चप्रत्ययेन बाध्यतइति युक्तं तत्प्रलयेनैवोत्पत्तेः । यत् पुनरुक्तं कथं प्रपञ्चप्रत्ययानुवृत्तिरिति तत्रोच्यते, तद्द्विविधं बाधकं भवति, यथा सत्येव मिथ्याज्ञानहेतुभूते पीतादौ जाते एव पीतशङ्खज्ञाने निमित्तान्तराद्यायं पीतइति मिथ्याज्ञानकारणापगमएव यथा सन्ध्यालोकप्रभवस्य शुक्तिकारजतज्ञानस्य महत्यालोके नेदं रजतमिति ज्ञानं तद्वदिहापि पीतशङ्खज्ञानबाधकवत् सत्येव मिथ्याज्ञानहेतुभूते शरीरप्रपञ्चस्य बाधकमद्वैतज्ञानमुत्पद्यते अतः स्वकारणात् बाधितमपि प्रपञ्चज्ञानं पीतशङ्खज्ञानवत् पुनर्जायते । ननु देहस्यापि प्रपञ्चान्तर्भूतत्वात् झटित्येव प्रविलयः प्रसज्यते न प्रारब्धकर्म्मवशात् तदनुवृत्तिः कर्म्मणः कुलालचक्रभ्रमिवत् संस्कारानुवृत्तेरिति सिद्धा जीवन्मुक्तिरिति कर्म्मसंस्कारक्षयात्तु देहे पाते सति सर्वथैव प्रपञ्चविलयः कर्म्मान्तराणाञ्च ज्ञानेन क्षयितत्वात् देहान्तरानुत्पत्तिः परममुक्तिरिति । एवञ्च सति ज्ञानमात्रान्मुक्तिरिति प्रतिपादनादेव कर्मणोमुक्तिहेतुत्वमपास्तमिति वेदितव्यं । तथाहि न तावत् केवलात् कर्म्मणोमुक्तिरश्रवणात्, नापि ततएव ज्ञानसहिताच्च श्रुतेरेव । ननु तं विद्याकर्मणी समन्वारभेते पूर्व्वप्रज्ञा चेति विद्याकर्मणोः सहभावः श्रूयते सत्यं संसारविषयन्तु सहभावश्रवणं न मुक्तिविषयं । ननु यावज्जीवमग्निहोत्रं जुहुयादिति चोदनाप्राप्तानां नित्यनैमित्तिककर्म्मणां ज्ञानस्य च अर्थात् मुमु-

यथानेकचक्षुःप्रकाशो रविर्न क्रमेण प्रकाशीकरोति प्रकाश्यम् ।
अनेका धियो यस्तयैकप्रबोधः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ७ ॥
विवस्वत्प्रभातं यथा रूपमक्षं प्रगृह्णाति नाभातमेयं विवस्वान् ।
तथाभात आभासयत्यक्षमेकः सनित्योपलब्धि स्वरूपोऽहमात्मा ॥ ८ ॥

स्यादेतत् चेन्न विनियोजकप्रमाणाभावात् । तमेतमात्मानं वेदानुवचनेन ब्राह्मणादित्यादिश्रुतिर्विनियोजिका अस्त्येवेतिचेन्न विविदिषासम्बन्धात् कर्म्मणां ज्ञानार्थत्वप्रतीतेर्मोक्षार्थत्वं नावगम्यतइति, किञ्च नहि ज्ञानमज्ञाननिवृत्तौ उपकारकमपेक्षते उत्पन्नादेव तस्मात्तन्निवृत्तेरवश्यम्भावात् तथाच श्रुतिः तमेव विदित्वातिमृत्युमित्यादिका । अपिच यदि कर्म्मफलं मोक्षोभवेत् तर्हि अनित्यत्वं प्रसज्येत घटादिवत् स्वर्गादिवच्चेति, अनुमत्यर्थं श्रुतिरित्याह तद्यथेह कर्म्मचितोलोकः क्षीयते इत्यादा अग्निहोत्रादिवत् कार्य्यार्थमेवेति सूत्रकारेण परम्परया कर्म्मणां मुक्तिफलं विहितं प्रयाजादिवत् अतोज्ञानार्थत्वेन कर्म्मणामनुपयोगोऽस्त्येव ज्ञानोत्पत्तेस्तु पुरस्तात् कर्म्मणामनुपयोगाभावेऽपि लोकसंग्रहार्थमनुष्ठानं कर्त्तव्यमेवेति सर्वं समञ्जसम् ॥६॥

ननु कथमेकएवात्मा अनेकां बुद्धिं युगपदधितिष्ठति नह्येकएवात्मावाहको युगपदनेकानश्वानधितिष्ठति दृश्यतेऽपलभ्यते क्रमेणाधिष्ठानन्तु युज्यते तच्चेह नास्ति युगपदेव सर्वासां बुद्धीनां स्वव्यापारे प्रवृत्तिदर्शनात् अनधिष्ठितानाञ्च प्रवृत्त्यभावात् अतो नैकआत्मा इत्याह । यथेत्यादि ।

यथा येन प्रकारेण प्रकाशत्वप्रकारेण रविरादित्यएकएवानेकेषां चक्षुषां प्रकाशो युगपदनेकानि चक्षूंषि अधितिष्ठति न क्रमेण एकैकस्मिन् चक्षुषे प्रकाश्यं प्रकाशीकरोति तथा तेनैव प्रकारेण एकश्चासौ प्रबोधस्वरूपश्चेति एकैव प्रबोधोऽधिष्ठाताऽनेका धियो बुद्धीर्युगपदधितिष्ठति न क्रमेण एकैकस्यै धिये प्रकाश्यं प्रकाशीकरोति यः सोऽहमात्मेति सम्बन्धः॥ ७ ॥

ननु अस्तु तर्हि विवेकः बुद्धीनां अधिष्ठाता किमात्माभ्युपगमेन तथाच श्रुतिः धियो योनः प्रचोदयादित्यतत्राह । विवस्वदिति ।

विवस्वतादित्येन प्रभातं प्रकाशितमित्यर्थः अक्षं चक्षुर्यथा रूपं

यथा सूर्य एकोऽप्यनेकचलासु स्थिरास्वधनन्वभाव्यस्वरूपः ।
चलासु प्रभिन्नासु धीष्वेकएवं स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ९ ॥
घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा निष्प्रभं मन्यते चातिमूढः ।
तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ १० ॥

घटादि प्रकृष्टं भाति प्रकर्षेण जानाति नाभातं न अप्रकाशितं अन्धकारे घटाद्यनुपलम्भात् (अत्र विवक्षायामपि एकस्तथा तेनैव प्रकारेण भातः प्रकाशितोऽधिष्ठितः सन्नाभासयति अधितिष्ठति अक्षं चक्षुः यस्य विवक्षतोऽधिष्ठाता सोऽहमात्मा सच सर्वासां बुद्धीनां अधिष्ठाता श्रुत्या च चक्षुरधिष्ठातारमभिप्रेत्य विवक्षतोबुद्धिप्रेरकत्वमभिहितं यस्माद्विषयदधिष्ठितं चक्षुर्बुद्धिसृष्टपादयति ॥ ८ ॥

ननु आत्मापि तर्हि प्रकाशान्तरेणाधिष्ठातव्यः न तस्य स्वप्रकाशता, नान्योऽतोऽस्ति द्रष्टेति श्रुत्या तत्र द्रष्टृन्तरप्रतिषेधादिति तदाह । यथेत्यादि ।

यथा येन प्रकारेण आदित्यएकोऽपि अप्सु वारिषु चलासु स्थिरासु च अनेकोऽपि नानापि एकः सन् प्रतिभासते अनन्वग् विभाव्यस्वरूपः अनु अञ्चति = गच्छति, अन्वक्, न अन्वक्, पृथगिति यावत् । यद्वा अन्वक्त्वेन विभाव्यं स्वरूपं यस्य स तथोक्तः एवं बहुव्रीहिसमासं कृत्वा पश्चात्कर्मसमासः ततश्चायमर्थोभवति । न वारिषु रविरनुगतोभवति किं तर्हि देदीप्यमानो भान्त्या तु वारिषु दृश्यतदृश्य एवमेकआत्मा चलासु प्रभिन्नासु नानाभूतासु धीषु बुद्धिषु अनेकः सन् अनन्वग्विभाव्यस्वरूपो न बुद्धीरनुगच्छति किन्तु पृथगेव देदीप्यमानो यः सोऽहमात्मेत्यर्थः ॥९॥

अपिच । घनेत्यादि ।

घनेन मेघेन च्छन्ना तिरोहिता दृष्टिर्दर्शनं यस्य स घनच्छन्नदृष्टिः पुरुषः घनेन च्छन्नमादित्यं यथा येन घनच्छन्नत्वप्रकारेण मन्यतेजानाति निष्प्रभं प्रभारहितं अप्रकाशस्वरूपमिति यावत् सूर्यं हि मन्यते घनच्छन्नदृष्टित्वात् प्रकाशस्वरूपमपि रविमप्रकाशमहं पश्यामीत्याह अतिमूढः अतिमूर्खइति अतिमूढत्वादात्मनोदृष्टिविघातमगणयन् सूर्यमेवाप्रकाशं

समस्तेषु वस्तुष्वनुस्यूतमेकं समस्तानि वस्तूनि यन्न स्पृशन्ति ।
वियद्वत् सदा शुद्धमच्छस्वरूपं स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ११ ॥
उपाधौ यथा भेदता सन्मणीनां तथा भेदता बुद्धिभेदेषु तेषु ।
यथा चन्द्रकाणां जले चञ्चलत्वं तथा चञ्चलत्वं तवापीह विष्णो ॥ १२ ॥

इति हस्तामलकं समाप्तं ।

मन्यते पादपूरणे च शब्दः । तथा तेनैव प्रकारेण अविद्याच्छन्नदृष्टिः पुरुषो बुद्धिमात्मत्वेन गृहीत्वा तद्गतसुखादिकमात्मनि मन्यमानो बद्धइव भाति यो मूढदृष्टेः सोऽहमात्मेति सम्बन्धः ॥ १० ॥

समस्तेष्वित्यादि ।

समस्तेषु निःशेषेषु वस्तुषु प्रपञ्चात्मकेषु सदाऽनुस्यूतमनुगतं सर्वतो व्याप्तमेकं न नाना समस्तानि वस्तूनि प्रपञ्चात्मकानि [illegible] न स्पृशन्ति कुतो वियद्वत् आकाशमिव सदा शुद्धं निर्मलं रागादिदोषरहितं अच्छस्वरूपं अमूर्त्तस्वरूपमिति यावत् । एवमेकं परं ब्रह्म यत् सोऽहमात्मेति ॥ ११ ॥

व्युत्पादितस्वरूपसंहरति । उपाधावित्यादि ।

उपाधौ उपाधिभेदसम्बन्धे सति यथा भेदएव भेदता स्वार्थे तनू सन्मणीनां विशुद्धमणीनां स्फटिकादीनां लोहितकृष्णादिभेदेन भेदता भेदस्तथा बुद्धिभेदेषु नानाबुद्धिषु तेऽपि तवापि नानात्वं हेविष्णो ! परमार्थतस्तु स भेदो नास्त्येव बुद्ध्युपाधिकृतभेदस्तु विस्तृतएवेत्यर्थः । यथा चन्द्रकाणां चन्द्राएव चन्द्रकाः स्वार्थे कः जलेषु प्रतिबिम्बरूपेषु अलं दृश्यमानं जलस्य चञ्चलत्वात् चञ्चलत्वं तथा बुद्धीनां तवापि चञ्चलत्वमौपाधिकं न पारमार्थिकं हे बुद्धिभेदेषु विष्णोर्व्यापनशीलस्येत्यर्थः ॥ १२ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्कृतौ हस्तामलकभाष्यं समाप्तम् ।

00041999

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018